ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# सामाजिकविज्ञानम्

## प्रथमा २

## (ધોરણ 10)

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

मूल्य : ₹ 17.00

गुजरातराज्यशालापाठ्यपुस्तकमंडलम्
'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम् - 382010

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

डॉ. ललितकुमारः पटेलः

**लेखनम्**

श्री सञ्जयकुमार एल. जोषी (कन्वीनर)
श्री शैलेषकुमारः एच. जोषी
डॉ. सञ्जयकुमारः एस. जोषी
श्री भाविनः डी. पाठकः
श्री रिषभः के. त्रिवेदी

**समीक्षणम्**

श्री मेहुलभाई के. भट्टः
श्री सञ्जयकुमारः के. ब्रह्मभट्टः
श्री पुरुषोत्तमः एस. रावलः
डॉ. सुभाषः वी. वसोया
श्री पार्थः आर. पण्ड्या
श्री परेशः एच. जानी

**भाषाशुद्धि**

श्री एच्. एम्. इन्दुशेखर भट्ट

**संयोजनम्**

डॉ. क्रिश्ना दवे
(विषय-संयोजक : अंग्रेजी)

**निमार्णयोजनम्**

श्री हरेन शाह
(उपनियामक : शैक्षणिकः)

**मुद्रणायोजनम्**

श्री हरेश एस. लीम्बाचीया
(उपनियामक : उत्पादन)

## प्रस्तावना

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **प्रथमा २ (धोरण 10) सामाजिकविज्ञानम्** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकप्रमुखः
ता.26-10-2020 — गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरात-राज्य-शाला-पाठ्यपुस्तक-मण्डल, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी. भारती, नियामकः
**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधानं प्रति प्रामाणिकत्वम्, आदर्शत्वं संस्थानां राष्ट्रध्वजस्य, राष्ट्रियगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अस्माकं राष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य, एकतायाः, अखण्डिततायाश्च समर्थनं।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां, तडागानां, नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसाय, मानवतावादाय, जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं, हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | वैदिकसूक्तपरिचयः | 1 |
| २. | वैदिकसाहित्यम् | 5 |
| ३. | द्वादशज्योतिर्लिङ्गानि | 9 |
| ४. | अस्माकम् आचार्याः | 13 |
| ५. | भारतस्य क्रान्तिवीराः | 18 |
| ६. | गुजरातस्य राजानः | 24 |
| ७. | धारासभा | 28 |
| ८. | मानवसंसाधनम् | 32 |
| ९. | अस्माकमधिकाराः कर्तव्यानि च | 35 |
| १०. | पृथ्वी | 39 |
| ११. | समुद्राः | 45 |
| १२. | भारतस्य नद्यः | 51 |
| १३. | गुजरातस्य वनानि | 56 |
| १४. | भारतस्य अर्थव्यवस्था | 64 |
| १५. | भारतीय-आपणतन्त्रम् | 69 |
| १६. | भारतीयोद्योगाः | 74 |

# १ वैदिकसूक्तपरिचयः

## प्रस्तावना

वेदसम्बन्धितं ज्ञानं वैदिकशब्देन व्यपदिश्यते। वेदाः चत्वारस्सन्ति। तत्र-पृथक् देवतानां स्तुतिरूपाणि सूक्तानि सन्ति। तेषु ऋग्वेदयजुर्वेदस्थितसूक्तेषु केषाञ्चित् सुप्रसिद्धसूक्तानां परिचयोऽत्र प्रस्थाप्यते।

यजुर्वेदस्थितसूक्तेषु (१) पुरूषसूक्तम् (२) अग्निसूक्तम् (३) नारायणसूक्तम् - इत्येतेषां सूक्तानामत्र परिचयो प्रदीयते।

ऋग्वेदस्थितसूक्तेषु 'श्री सूक्तम्' इत्यस्य परिचयोऽत्र प्रस्थाप्यते।

वेदोक्तसूक्तेषु सर्वविधज्ञानं सुसमाहितं वर्तते। वेदाः मानवजीवनस्याधारभूताः सन्ति। तत्र वेदेषु दार्शनिक-भौतिकाद्यनेकविषयाणां मनोरमं ज्ञानं सुस्थितं वर्तते। पृथक् पृथक् सूक्तेषु पृथक् पृथक् विषयाणां वर्णनम् अस्ति। इत्थंभूताः वेदाः अस्माभिः संरक्षणीयाः येन मानवजीवनमूल्यानां संवर्धनं भवेत्। यथा 'वेदोऽखिलो धर्ममूलम्' इति वाक्यं वेदमहत्त्वं प्रदर्शयति।

---

### पुरुषसूक्तस्य परिचयः (यजुर्वेदः)

पुरुषसूक्तस्य नारायण ऋषिः, अनुष्टुप् छन्दः, विराट्पुरुषः देवता अस्ति। सूक्तमिदं शुक्लयजुर्वेदे एकत्रिंशाध्याये वर्तते। प्रारंभतः षोडशमन्त्राः पुरुषसूक्तनाम्ना प्रसिद्धाः सन्ति। रूद्राष्टाध्यायीमध्ये द्वितीयाध्याये 'सहस्रशीर्षा पुरुषः.... इति मन्त्रादारभ्य 'यज्ञेनयज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इति मन्त्रपर्यन्तं षोडशमन्त्राः 'पुरुषसूक्तम्' इति नाम्ना ख्यातास्सन्ति।

एभिर्मन्त्रैः षोडशोपचारादि, देवपूजनादि कर्माणि सम्पद्यन्ते। देवतानाम् आवाहनात् मन्त्रपुष्पाञ्जलिपर्यन्तम् अस्यैव पुरुषसूक्तस्य मन्त्राणां सविशेषरूपेण उपयोगः क्रियते। विष्णुयागादि-वैष्णवयज्ञेषु अपि पुरुषसूक्तस्य मन्त्रैः सर्वाः क्रियाः सम्पन्नाः भवन्ति।

पुरुषसूक्तस्य प्रथममन्त्रे विराट्-पुरुषस्य अतिभव्यं दीव्यञ्च वर्णनं वर्तते। यथा 'सहस्रशीर्षा पुरुषः' इति मन्त्रे विराट् पुरुषः समग्रब्रह्माण्डे व्याप्य दशाङगुलम् उपरि स्थितः इति व्यापकत्वं निदर्शितम्। ईश्वरस्य सत्ता-शासनम् सर्वत्र वर्तते इति प्रतिपादितम् अस्ति।

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत ॥यजु. ३१/११**

मन्त्रद्रष्टृभिः ऋषिभिश्च कथितं यत् विराट्पुरुषेण (सृष्टिसम्बन्धितेन यज्ञेन) इदं जगत् समुत्पादितम्। यथा मुखात् ब्राह्मणानाम्, बाहुभ्यां क्षत्रियाणाम्, ऊरुभ्यां वैश्यानां तथा चरणाभ्यां शूद्राणाम् उत्पत्तिः कृता। मनसः चन्द्रमसः, नेत्राभ्यां सूर्यस्य, मुखात् अग्नेः तथा प्राणात् वायोरुत्पत्तिः वर्णिता। अस्य कथनस्याभिप्रायोऽस्ति यत् मनसः अधिष्ठातृदेवता चन्द्रमाः वर्तते। चक्षुषोः अधिष्ठातृदेवता सूर्यः वर्तते। कर्णयोः अधिष्ठातृदेवता वायुः वर्तते। तथा वाचः अधिष्ठातृदेवता अग्निः वर्तते इति भावः। ब्राह्मणाग्न्योः प्रादुर्भावः एकस्मादेव स्थानाज्जातः अतः उभयोः स्थानं सममेव गण्यते। तदर्थं अग्नये आहुतिप्रदानार्थं ब्राह्मणः श्रेष्ठः गण्यते। ब्राह्मणः साक्षात् अग्निस्वरूपात्मकः इति भावः।

**नाभ्याऽआसीदन्तरिक्ष६ शीर्ष्णो द्यौः समवर्तत।**
**पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्॥ यजु. ३१/१३**

विराट्पुरुषस्य नाभिभागात् अन्तरिक्षं (आकाशम्), मस्तकात् द्युलोकः (स्वर्गः), पद्भ्यां पृथ्वी, कर्णाभ्यां दिशः प्रादुर्भूताः। अनेन प्रकारेण ईश्वरस्य अवयवेभ्यः भूर्लोकः भुवर्लोकः स्वर्लोकः, महर्लोकः, जनलोकः, तपोलोकः तथा च सत्यलोकस्य कल्पना कृता वर्तते।

विश्वस्य एवं सम्पूर्णप्राणिनां सर्जनं केन प्रकारेण जातम् ? अस्याधारस्तम्भः कः वर्तते ? इत्यादि सृष्टि-रचनासम्बद्धानां सर्वेषां प्रश्नानां दिव्योत्तराणि पुरुषसूक्तार्थे वर्तन्ते।

### नारायणसूक्तस्य परिचयः (यजुर्वेदः)

शुक्लयजुर्वेदे सूक्तमिदं वर्तते। अस्य सूक्तस्य नारायणऋषिः, आदित्यपुरुषः देवता, भूरिगार्षी-त्रिष्टुप्-निच्यृदार्षी-

त्रिष्टुम् एवम् आर्ष्यनुष्टुप् छन्दांसि वर्तन्ते। इदं सूक्तं यजुर्वेदस्य एकत्रिंशत्तमाध्याये ''अद्भ्यः सम्भृतः ....'' इत्यादिमन्त्रादारभ्य ''श्रीश्च ते लक्ष्मीश्चपक्त्न्या...'' इति मन्त्रं यावत् षड् मन्त्रात्मकं नारायणसूक्तं वर्तते। सूक्तमिदं 'उत्तरनारायणसूक्तम्' इति नाम्नाऽपि ख्यातं वर्तते। रूद्राष्टाध्यायीमध्ये पुरुषसूक्तानन्तरं नारायणसूक्तं वर्तते। अस्मिन् सूक्ते सृष्टिविन्यासेन सह व्यक्तेः कर्तव्यबोधः अपि ज्ञायते। आदिपुरुषस्य महिमापि निदर्शितोऽस्ति।

अयं परमपुरुषः नारायणः कुत्र वसति ? इति विषये कथितम्।

**प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते।**

**तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा॥ यजु. ३१/१९**

परमात्मा सर्वेषामाभ्यन्तरे स्थितः। यथा काष्ठेषु अग्निः दुग्धेषु घृतम् तद्वत् अस्योपस्थितिः सर्वत्र ज्ञेया। तत् परमात्मतत्त्वं मन्थनत्त्वादेवाविर्भवति। यथा दधिमन्थनेन घृतं प्राप्यते तद्वत् परमात्मा शास्त्रादिभिः सद्गुरुभिः ज्ञातव्यः अनुभावितव्यश्च इति।

एवमेव उत्तरनारायणसूक्ते परमात्मसूक्तं वर्णितं वर्तते। अस्य सूक्तस्य यज्ञयागादिक्रियासु सविशेषरूपेण उपयोगः भवति।

## अग्निसूक्तस्य परिचयः (यजुर्वेदः)

अस्य सूक्तस्य प्रजापतिर्ऋषिः, अग्निर्देवता, त्रिष्टुप् छन्दः वर्तते। सूक्तमिदं यजुर्वेदस्य सप्तविंशाध्याये ''समास्वाग्न ऋतवो ...'' इतिमन्त्रादारभ्य ''अमुत्रभूयाध'' इति मन्त्रपर्यन्तं नव मन्त्रात्मकम् अग्निसूक्तं प्रसिद्धं वर्तते। अत्रत्याः मन्त्राः पञ्चचीतिकस्याग्नेः वर्तन्ते। अस्मिन् सूक्ते अग्निः देवतारूपेण वर्णितः अस्ति। यथा

**समास्त्वाग्नऽऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या।**

**सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः॥ यजु. २७/१**

अत्र अग्नेः समीपे सर्वेषां कल्याणं भवेत् इति प्रार्थना कृता वर्तते। जीवनम् अग्निं विना शक्यं नास्ति, अग्निना एव सर्वाणि भूतानि जातानि। तेनैव इमाः प्रजाः पाल्यन्ते तेनैव संह्रियते च। अतोऽस्य सूक्तस्य मन्त्रद्रष्ट्रा ऋषिणा अग्नये कथितं यत् 'आभाहि प्रदिशश्चतस्रः' हे अग्ने त्वं विश्वस्य सर्वाः दिशः प्रदिशः विदिशः चतस्रः दिशश्च स्वप्रकाशेन तेजसा दीपय। अत्र मन्त्रे विश्वशब्दस्य प्रयोगत्वात् वेदानां वैश्विकीभावनायाः अत्र निदर्शनं भवति। सूक्तेऽस्मिन् जातिधर्मसम्प्रदायादिभिः पृथक् भूत्वा विश्वकल्याणार्थम् अग्नेः सकाशात् निष्पक्षतया याचना कृता वर्तते। अत्र वेदानां सर्वोपकारिकत्वम् सिद्ध्यति। यथा

**अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह।**

**विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परिपाहि नो वृधे॥ यजु. २७/१**

अत्रापि मन्त्रे विश्वकल्याणस्य भावना स्थिता भाति। सर्वासु दिक्षु विदिक्षु मानवभयं दूरीकर्तुं अग्नेः समीपे प्रार्थना कृताऽस्ति।

अतः सूक्तमाध्यमेन वेदानां वैश्विकीं भावनां दृढीकर्तुं महत्त्वपूर्णं स्वकीयं योगदानं वर्तते इति सिद्ध्यति। तद्यथा

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखमाप्नुयात् ॥**

अस्य सूक्तस्य मन्त्राणां प्रयोगः यज्ञयागादिक्रियाकाण्डमध्ये सविशेषणरूपेण क्रियते। यतः अग्नेः कृपा सर्वत्र भवेत् इति भावना दृढीभवति।

## श्रीसूक्तस्य परिचयः (ऋग्वेदः)

सूक्तमिदं ऋग्वेदस्य परिशिष्टखिलसूक्तेषु दृग्गोचरं भवति। अस्य सूक्तस्य आनन्दकर्दम चिक्लीत जातवेद-ऋषिः, श्रीः देवता, अनुष्टुप्प्रस्तारपङ्क्तिः त्रिष्टुप् छन्दः वर्तते।

''हिरण्यवर्णां हरिणीं'' मंत्रादारभ्य ''ऽश्वानविन्देयं पुरुषानहम्'' इति मन्त्रपर्यन्तं पञ्चदशर्चं सूक्तं 'श्रीसूक्तम्' इति नाम्ना प्रसिद्धं वर्तते। तथा च षोडश्याम् ऋचि सूक्तोपसंहारः एवं फलश्रुतिः वर्णितास्ति। यथा

**सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।**

देव्याः पूजने श्रीसूक्तस्यातीव प्राधान्यं वर्तते। विशेषतः लक्ष्मीदेव्याः प्रसन्नतायै श्रीसूक्तपाठाभिषेकयोः सविशेष-महिमा वर्णितोऽस्ति।

ऐश्वर्यस्य एवं समृद्धेः कामनायै अस्य सूक्तस्य मन्त्राणां पाठः (आवर्तनं) एभिर्मन्त्रैः कृतो यज्ञः वा एभिर्मन्त्रैः कृतं पूजनाभिषेकादिकं कर्म सिद्धिप्रदं भवति।

वस्तुतः श्रीसूक्तं काम्यसूक्तरूपेणाधिकं प्रचलितमस्ति। सूक्तेऽस्मिन् देव्याः सन्निधौ ऐहिक वैभवस्य याचना कृताऽस्ति इति ज्ञायते। यथा –

**मनसः काममाकूतिं वाचः सत्यमशीमहि।**

**पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥**

अत्र प्रमुखतया 'कुर्वन्नेवेहकर्माणि जिजीविषेच्छतं समाः' इत्यस्य भावना सन्निहिता वर्तते। अत्र निदर्शिता श्रीः दयाभावयुता तोषयित्रि स्वयंतृप्ता इत्यादिस्वरूपेण वर्णिता दृश्यते।

अत्र श्रीसूक्ते सूक्तकारः लक्ष्म्याः सन्निधौ संपूर्णराष्ट्रस्य समृद्ध्यर्थम् राष्ट्रवासिनां कृते सुखशान्तिप्राप्त्यर्थं प्रार्थनां करोति। यथा –

**उपैतु मां देवसखः कीर्तिश्च मणिना सह।**

**प्रादुर्भूतोसुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥**

अस्माकं वैदिकसमाजः केवलं धान्यागारस्य कामनां न करोति अपि तु सुजलायाः सुफलायाः सस्यश्यामलायाः भूमेः याचनां करोति।

ऋग्वेदे सहस्राधिकानि सूक्तानि वर्णितानि सन्ति। तेषु श्रीसूक्तं सविशेषप्रकारेण यज्ञानुष्ठानादिप्रयोगत्वात् लोकभोग्यं वर्तते।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।**

(१) पुरुषसूक्ते ......... मन्त्राः सन्ति। (१२, १६, १४)

(२) नारायणसूक्ते ......... मन्त्राः सन्ति। (५, ६, ७)

(३) श्रीसूक्ते ......... मन्त्राः सन्ति। (१५, १७, १८)

(४) ......... सूक्तप्रधानः वर्तते। (यजुर्वेदः, ऋग्वेदः, सामवेदः)

(५) श्रीसूक्तं ......... सूक्तं वर्तते। (काम्य, याम्य, संवाद)

(६) परमात्मा सर्वेषां ......... स्थितः वर्तते। (आभ्यन्तरे, बाह्यभागे, ऊषरभूमौ)

(७) चिक्लीत ऋषिः ......... सूक्तस्य वर्तते। (श्री, पुरुष, पवमान)

(८) पुरुषसूक्तस्य प्रथममन्त्रे ......... वर्णनं वर्तते। (विराट्पुरुषस्य, देव्याः, शिवस्य)

(९) यजुर्वेदस्य ......... अध्याये पुरुषसूक्तं वर्तते। (३०, ३१, ३२)

(१०) यजुर्वेदस्य ......... अध्याये अग्निसूक्तं वर्तते। (२७, २८, २९)

**२. एकेन वाक्येन उत्तराणि लिखन्तु।**

(१) वेदाः कति सन्ति ?

(२) "यज्ञेन यज्ञमयजन्त...." इत्यादिमन्त्रः कस्य सूक्तस्य वर्तते ?

(३) देव्याः अर्चने कस्य सूक्तस्य प्राधान्यं वर्तते ?

(४) अग्निसूक्ते कस्य देवस्य विशेषता प्रतिपादितास्ति ?

(५) 'सर्वे भवन्तु सुखिनः' इति भावना कस्मिन् सूक्ते वर्तते ?

(६) केन विना जीवनं शक्यं नास्ति ?

(७) वेदार्थः कैः सम्यक् ज्ञातव्यः ?

### ३. टिप्पणीं लिखन्तु।

(१) पुरुषस्वरूपम्। (२) श्री-सूक्तपरिचयः।

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) नारायणसूक्तस्य सविस्तरं परिचयं लिखन्तु।

(२) अग्निसूक्तस्य वैशिष्ट्यं सविस्तरेण लिखन्तु।

### ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) श्रीसूक्तम् | (१) ६ मन्त्राः |
| (२) पुरुषसूक्तम् | (२) १५ मन्त्राः |
| (३) नारायणसूक्तम् | (३) १६ मन्त्राः |
| (४) अग्निसूक्तम् | (४) ४ |
| (५) वेदाः | (५) ९ मन्त्राः |
| | (६) १२ मन्त्राः |

**छात्रप्रवृत्तिः**

- पाठे प्रदत्तसूक्तानि सम्पूर्णानि लिखित्वा कण्ठस्थी करणीयानि तथा प्रार्थनासभायां पठेयुः।

**सुभाषितम्**

**यथा खनन्खनित्रेण नरोवार्यधि गच्छति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥ ( याज्ञ. शिक्षा )**

# २ वैदिकसाहित्यम्

## प्रस्तावना

विश्वस्मिन् भारतीयसंस्कृतिः महासंस्कृतिस्वरूपेण ख्यातिं प्राप्ता। एतस्याः संस्कृत्याः मूलं साहित्यमस्ति। आधुनिके युगेऽपि संस्कृतेः अवगणना नैव क्रियते। भारतीयसंस्कृतिः सर्वमानवजातीनां मूलमस्ति। वैज्ञानिकसंशोधनक्षेत्रेऽपि प्राचीनग्रन्थानां तथा वेदानां योगदानमधिकं वर्तते। समग्रसाहित्ये वेदानां योगदानमस्त्येव।

## वेदाः

भारतीयानां मान्यतानुसारं वेदाः सृष्टिक्रमस्य प्रथमा वाणी। (ब्राह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै – श्वेताश्वतरोपनिषत् ६/१८) को नाम वेदः ? इति जिज्ञासायाम् इष्टप्राप्तिः अनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः। अपौरुषेयं वाक्यं वेदः (अर्थसंग्रहः – पृ – ३६)। वेदाः मुख्यतया चतुर्षु विभागेषु विभक्ताः सन्ति।

### १. ऋग्वेदः

''रूच्यते स्तूयते यया सा ऋक्'' इति ऋग्शब्दस्य व्युत्पत्तिः। पाश्चात्यैः पौर्वात्यैश्च विद्वद्भिः ऋग्वेदसंहितायाः अन्यसंहिताभ्यः प्राचीनत्वम् उपवर्ण्यते। ऋग्वेद-गतमन्त्रद्रष्टारो ऋषयः गृत्समद-विश्वामित्र-वामदेव-दीर्घतमाऽत्रि-भारद्वाज-वसिष्ठादयः सन्ति। द्वितीयमण्डलादारभ्य सप्तममण्डल-पर्यन्तानां मण्डलानां सम्बन्धः एतेषां ऋषीणां वंशेन सह सम्बद्धः अस्ति। अत एवायं भागः वंशमण्डलमित्यभिधीयते। ''ऋग्वेदः'' एव ऋक्संहिता शब्देन अभिधीयते। ऋग्वेदविभाजनस्य द्वौ प्रकारौ स्तः। १.१ अष्टकविभागः, १.२ मण्डलविभागः।

**१.१ अष्टकविभागः** – अष्टकविभागानुसारं समग्रऋग्वेदस्य विभाजनम् अष्टकेन कृतम्। प्रत्येकस्मिन् अष्टके अष्टौ-अध्यायाः सन्ति। अध्यायस्य अन्ते वर्गः आगच्छति। ऋचां समुदायस्य नाम वर्गः, सर्वे मिलित्वा २००६ वर्गाः सन्ति।

**१.२ मण्डलविभागः** – अष्टकविभागः यंत्रवत् प्रतीतोऽस्ति। ऋग्वेदस्य मण्डलविभागे विभाजनं बहुवैज्ञानिकं, बुद्धिगम्यम् एवं रसप्रदमस्ति। समग्रऋग्वेदे १० मण्डलानि सन्ति। मण्डलस्य अनुवाकेषु, अनुवाकस्य सूक्तेषु, एवं सूक्तस्य मंत्रेषु विभाजनं कृतमस्ति। ऋग्वेदे सर्वे मिलित्वा १० मण्डलानि, ८५ अनुवाकाः, १०१७ सूक्तानि एवं १०५८० मन्त्राः वर्तन्ते। प्राचीनकाले ऋग्वेदस्य २१ शाखाः अभवन्। किन्तु अद्य केवलं शाकलशाखायाः अस्तित्त्वमस्ति।

### २. यजुर्वेदः

भारते मुख्यतया एषा संहिता प्रचलितास्ति। निरुक्तकारः यास्कः यजुः 'यज्' धातोः निष्पन्नः इति मनुते। (निरुक्तम् – ७/२०) यज्ञकार्ये उपयोगाय ये मन्त्राः आगताः ते यजुषः सन्ति एवमेषः मन्त्रसंग्रहः यजुर्वेदः कथ्यते। यजुर्वेदस्य द्वौ विभागौ स्तः। २.१ शुक्लयजुर्वेदः। आदित्यसम्प्रदायः। २.२ कृष्णयजुर्वेदः। ब्रह्मसम्प्रदायः।

**२.१ शुक्लयजुर्वेदः।** – शुक्लयजुर्वेदे ४० अध्यायाः सन्ति, एवं १९७४ मन्त्राः सन्ति। तस्य अन्तिमे ४० अध्याये सुप्रसिद्धा ईशावास्योपनिषदस्ति। यजुर्वेदे दर्शपौर्णमासस्य, अग्निहोत्रस्य, राजसूयस्य, अश्वमेधयज्ञस्य च मन्त्राणां संग्रहोऽस्ति। तत्र १६ अध्याये रुद्रस्य सर्वांगसुन्दरं वर्णनमस्ति। ३१ अध्याये पुरुषसूक्तमस्ति। ३४ अध्याये शिवसङ्कल्पस्य सुप्रसिद्धाः मन्त्राः सन्ति। शुक्लयजुर्वेदस्य काण्वमाध्यन्दिनशाखे प्रचलिते स्तः।

**२.२ कृष्णयजुर्वेदः।** – कृष्णयजुर्वेदस्य विषयः यज्ञ एवास्ति। तस्य मुख्यशाखायाः नाम तैत्तिरीयशाखा अस्ति। एतस्य उत्पत्तिविषये एका कथा प्रचलितास्ति। वैशम्पायनगुरोः पार्श्वे याज्ञवल्क्यः अभ्यासं करोति स्म। तत्र कस्मादपि कारणात् गुरुः क्रुद्धोऽभवत्। याज्ञवल्क्यसमीपे यद् ज्ञानमासीत् तत् सर्वं छिन्नमभवत्। अनन्तरं याज्ञवल्क्यः गुरोः आज्ञापालनं कृत्वा पठन-पाठने यजुषः वमनमकरोत् एवं अन्यशिष्याः तित्तरी वा तेतरपक्षिरूपधारणं कृत्वा यजुषः प्राप्तवन्तः। एवं रीत्या तैत्तिरीयशाखायाः निर्माणमभवत्। कृष्णयजुर्वेदे तैत्तिरीय मैत्रायणी-कठ-काठक-नामकाः चतस्रः शाखाः अभवन्।

यजुर्वेदे यज्ञसंस्थायाः विकसितं स्वरूपं दृग्गोचरं भवति। अद्य शुक्लयजुर्वेदस्य माध्यन्दिनशाखा गुजराते प्रसिद्धा अस्ति। कृष्णयजुर्वेदस्य विद्वांसः दाक्षिणात्याः प्रसिद्धाः सन्ति।

### ३. सामवेदः

भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम् ''वेदानां सामवेदोऽस्मि'' (श्रीमद्भगवद्गीता - १०/२२) एवमुक्त्वा सामवेदस्य महत्त्वं दर्शितम्। सामशब्दस्य अर्थः अस्ति ''गानम्''। सामवेदे आहत्य १८७५ मन्त्राः सन्ति। तत्र ७५ मन्त्राः नूतनाः सन्ति। अन्ये सर्वे ऋग्वेदसंहिताद्वारा स्वीकृताः सन्ति। अग्निः, इन्द्रः, सोमः इत्यादिदेवानां मन्त्राः अत्र प्राप्यन्ते। सामवेदस्य पूर्वार्चिकोत्तरार्चिकेति द्वौ भागौ स्तः। यः सामवेदस्य मन्त्रगानं करोति स ऋत्विक् उद्गाता कथ्यते। सामवेदः भारतीय-संगीतशास्त्रस्य आदिमूलमस्ति। सा, रे, ग, म, प, ध, नि इत्यादिस्वराः सामवेदीयाः सन्ति। वैदिककाले सङ्गीतस्य महत्त्वमासीत्, तत् सामवेदः सिद्धं करोति। अद्य केवलं तिस्त्रः शाखाः प्रसिद्धाः सन्ति यथा - कौथुमीय, राणायनीय एवं जैमिनीय। कौथुमीयशाखायाः प्रसारः गुजरातप्रदेशे नागरब्राह्मणेषु दृग्गोचरः भवति।

विष्णुपुराणानुसारेण वेदव्यासः कृष्णद्वैपायनः वेदं चतुर्धा विभज्य स्वशिष्याय जैमिनये सामवेदं पाठयामास। जैमिनिः स्वपुत्रं सुमन्तुं, सुमन्तुः स्वात्मजं सुन्वन्तं, सुन्वान् स्वपुत्रं सुकर्माणं च सामवेदं पाठयामास इति सामवेदसंहितायाः प्राचीनपरम्परा आसीत्।

### ४. अथर्ववेदः

अथर्ववेदः अपि अतीवप्रसिद्धः वेदोऽस्ति। अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेदः, ब्रह्मवेदः, अंगिरावेदः, अथर्वाङ्गिरस (अथर्वाऽनमेतास्वेवाप्स्वन्विच्छ - गोपथब्राह्मण - १/४) वेदः इत्यादीनि नामानि प्रमुखतां भजन्ते। जीवनस्य सुख-समृद्ध्यर्थं येषां साधनानां आवश्यकता भवति, तेषां सिद्ध्यर्थमिह अनेकेषामनुष्ठानानां निर्देशः कृतो वर्तते। अत्र २० काण्डानि, ३४ प्रपाठकाः, ११ अनुवाकाः, ७३१ सूक्तानि, ५१८७ मन्त्राः सन्ति। यद्यपि पिप्पलाद-स्तौद-मोद-शौनकीय-जाजल-जलद-ब्रह्मवद-देवदर्श-चारणवैधारण्याः नवशाखाः यत्र-तत्र वर्णिताः सन्ति। सम्प्रति अथर्ववेदस्य द्वावेव शाखे समुपलभ्येते। पिप्पलादशौनकारण्ये। ''पृथ्वी मम माता अस्ति'' एवं ''अहं तस्य पुत्रोऽस्मि।'' एतादृशी प्रसिद्धा सूक्तिः राष्ट्रप्रेम्णः भावनाजागरणं करोति। चतुर्षु वेदेषु विश्वबन्धुत्वस्य एवं विश्वनागरिकतायाः उदात्तभावना अस्ति।

### ब्राह्मणग्रन्थः

''ब्राह्मणं वेदसंघाते वेदभागे नपुंसकम्'' इति वचनानुसारेण ग्रन्थवाचकस्य ब्राह्मणशब्दस्य प्रयोगः नपुंसकलिङ्गे भवति। तैत्तिरीयसंहितायां, पाणिनीयव्याकरणे, निरुक्ते, शतपथब्राह्मणे, ऐतरेयब्राह्मणे च ब्राह्मणशब्दस्य ग्रन्थस्यार्थप्रयोगः समुपलभ्यते। वैदिकमन्त्राणां व्याख्यास्वरूपत्वादेव ब्राह्मणग्रन्थानामिदमभिधानं प्रचलितमभूत्। (ब्राह्मणा नाम कर्मणस्तन्मन्त्राणां च व्याख्याग्रन्थः - तै. सं. १/५/१ भाष्यम्) यज्ञीय-कर्मकाण्डस्य व्याख्याविवरणयोः सम्पादनं ब्राह्मणग्रन्थानां मुख्यो विषयः यथोक्तं-विद्वद्वरेण्यवाचस्पतिमिश्रेणः-

**नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।**
**प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥**

वेदस्य शेषभूता इमे ब्राह्मणग्रन्थाः यज्ञानुष्ठानस्य विस्तृतं विवेचनं कुर्वन्ति। ब्राह्मणसाहित्यमिदमतीवविशालं, गद्यात्मकं, यज्ञविधानकालनिर्देशकं, अधिकारि नियामकञ्चास्ति। ब्राह्मणानां मुख्यो विषयो विधिरस्ति। कर्मणां विधानं कदा स्यात् ? केन प्रकारेण तत् कर्म कर्तव्यम् ? तेषां कर्मणां साधनानि कानि सन्ति ? तेषां यज्ञानामधिकारिणः के भवन्ति ? इत्यादिकानां प्रश्नानां समाधानं ब्राह्मणग्रन्थेषु एव समुपलभ्यते। ब्राह्मणग्रन्थानां विधेः दशप्रकाराः भवन्ति। यथोक्तम् -

**हेतुर्निर्वचनं निन्दाप्रशंसासंशयोविधिः।**
**परक्रियापुराकल्पोव्यवधारणकल्पना।**
**उपमानं दशैते तु विधयो ब्राह्मणस्य तु॥**

ब्राह्मणसाहित्यमतीवव्यापकं विशालञ्चास्ति। यद्यपि साम्प्रतं ब्राह्मणसाहित्यस्य महान् भागो नहि समुपलभ्यते। तेषां कतिपयान्युदाहरणान्येव कतिपयेषु श्रौतग्रन्थेषु समुपलभ्यन्ते। ब्राह्मणग्रन्थः यथा - कौषीतकि, ऐतरेयम्, शतपथम्, तैत्तिरीयम्, मैत्रायणि, काठकम्, ताण्ड्यम्, पञ्चविंशम्, षड्विंशम्, छान्दोग्यम्, वंशम्, आर्षेयम्, जैमिनीयम्, तवल्कारम्, गोपथञ्च वर्तते।

### आरण्यकम्

**अरण्याध्ययनादेतदारण्यकमितीर्यते।**
**अरण्ये तदधीयेतेत्येवं वाक्यं प्रचक्षते॥**

सायणाचार्यस्य उपर्युक्तवचनानुसारेण अरण्ये अध्ययनान् अस्य नाम आरण्यकमिति। यत: मन्त्राणां मननस्य सर्वश्रेष्ठस्थानमरण्यमेव भवति। एतेषामारण्यकग्रन्थानां प्रतिपाद्यविषय आत्मतत्त्वस्य मीमांसा अस्ति, अस्यां दिशायां प्राणविद्या प्रतीकोपासना च आरण्यकग्रन्थानां महनीया विशेषता अस्ति। आरण्यकग्रन्थानां महत्त्वं कृष्णद्वैपायनेन लिखितमस्ति। ''आरण्यकाश्च वेदेभ्य: औषधिभ्योऽमृतं यथा'' अर्थात् येन प्रकारेण औषधिभ्योऽमृतं गृहीतं, तेनैव प्रकारेण वेदेभ्य आरण्यकग्रन्था: संगृहीता: सन्ति।

प्राणविद्याप्रधान: मन्त्रब्राह्मणात्मक: वेदांश एवारण्यकमिति संज्ञां लभते। अर्थादारण्यकग्रन्थानां मुख्यप्रतिपाद्यविषय: प्राणविद्या एवास्ति। तैत्तिरीयारण्यके ऐतरेयारण्यके च प्राणविद्या सविशेषेण प्रतिपादिताऽस्ति। एतरेयारण्यके समुल्लिखतमस्ति यत् ''प्राण'' एव ऋषिरूपोऽस्ति, यथा विश्वं मित्रं यस्य स विश्वामित्र:। सर्वापन्नोऽत्रायत इति अत्रि:। एतादृश: गृत्समद:, वामदेव:, वसिष्ठ:, भारद्वाज: इत्यादय: सर्वे प्राणरूपा एव सन्ति। आरण्यकग्रन्था: यथा - कोषीतकि-ऐतरेय-बृहदारण्यक-तैत्तिरीय-जैमिनीय-तवल्काराश्च सन्ति।

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।**

(१) वेदा: मुख्यतया ......... विभागेषु विभक्ता: सन्ति । (पञ्च, सप्त, चतुर्षु)

(२) ऋग्वेदविभाजनस्य ......... प्रकारौ स्त:। (त्रय, पञ्च, द्वौ)

(३) समग्रऋग्वेदे ......... मण्डलानि सन्ति। (९, १२, १०)

(४) ......... वेदे चत्वारिंशत् अध्याया: सन्ति। (सामवेदे, ऋग्वेदे, शुक्लयजुर्वेदे)

(५) शुक्लयजुर्वेदस्य षेडशे अध्याये ......... सर्वांगसुन्दरं वर्णनमस्ति। (रुद्रस्य, इन्द्रस्य, वरुणस्य)

(६) ''वेदानां सामवेदोऽस्मि'' ......... उक्तम्। (अर्जुनेन, रुद्रेण, कृष्णेन)

(७) अथर्ववेदे ......... काण्डानि सन्ति। (२२, २५, २०)

**२. एकेन वाक्येन उत्तराणि लिखन्तु।**

(१) को नाम वेद: ?

(२) ऋग्वेदे कति मन्त्रा: सन्ति ?

(३) पुरुषसूक्तस्य वर्णनं कस्मिन् वेदे अस्ति ?

(४) सामवेदस्य कोऽर्थ: ?

(५) अथर्ववेदे कति प्रपाठका: सन्ति ?

**३. टिप्पणीं लिखन्तु।**

(१) ब्राह्मणग्रन्थ:। (२) आरण्यकम् (३) कृष्णयजुर्वेद:

**४. सविस्तरम् उत्तरं लिखन्तु।**

(१) ऋग्वेदस्य परिचय:।

(२) सामवेदस्य महत्त्वम्।

### ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) ऋग्वेदः | (१) आरण्यकग्रन्थानां महत्त्वम् |
| (२) यजुर्वेदः | (२) ७३६ सूक्तानि |
| (३) सामवेदः | (३) १०५८० मन्त्राः |
| (४) अथर्ववेदः | (४) १८७५ मन्त्राः |
| (५) कृष्णद्वैपायनः | (५) १६७५ |

**छात्रप्रवृत्तिः**

- छात्राः वैदिकसाहित्यविषये वर्गे परिसंवादं कुर्युः।

**सुभाषितम्**

**संस्कृते संस्कृतिर्ज्ञेया**
**संस्कृते सकला कलाः।**
**संस्कृते सर्वविज्ञानं**
**संस्कृते किं न विद्यते॥**

# ३ द्वादशज्योतिर्लिङ्गानि

**प्रस्तावना**

भारतस्य सांस्कृतिकमूल्यानां रक्षणाय आदिगुरुशङ्कराचार्येण चतुर्दिक्षु पीठानां स्थापना कृता। साम्प्रतकालेऽपि भारतीयसंस्कृत्याः संरक्षणाय विविधानि कार्याणि भवन्ति। किन्तु आध्यात्मिकरक्षणं केन जायते ?

अस्माकं देशे भिन्नप्रान्तेषु समयान्तरे स्वयंप्रकाशितानां लिङ्गानां प्रादुर्भावः जातः। तानि लिङ्गानि भारतीयजनमानसे अत्यधिकं प्रभावम् अनुगृह्णन्ति।

शिवलिङ्गानि पुरुषप्रकृत्योः प्रतीकरूपाणि वर्तन्ते। सम्पूर्णब्रह्माण्डस्य प्रतीकात्मकं सञ्चालनम् अर्थात् शिवलिङ्गम्। अपरं मतं वर्तते यद् ज्योतिः अर्थात् प्रकाशः तेन आधारेण कथितुं शक्यते यद् ज्ञानरुपं प्रकाशपुञ्जं शिवलिङ्गम् इति।

---

**ओङ्कारेश्वर -**



ओङ्कारममलेश्वरम् इति यदुक्तं तत्र निर्दिष्टम् ओङ्कारेश्वरक्षेत्रम् अस्ति। इदानीन्तनमध्यप्रदेशे एतत् क्षेत्रं नर्मदानदीतीरे विराजते। एतस्य क्षेत्रस्य ''मान्धाता'' इति नामान्तरमपि अस्ति। अत्र एकस्मिन् एव क्षेत्रे ज्योतिर्लिङ्गद्वयम् अस्ति। ओङ्कारेश्वरः अमलेश्वरः च। इदानीं विद्यमानम् ओङ्कारेश्वरमन्दिरं राज्ञी अहल्याबाई निरमापयत्। अत्रत्यस्य शिवलिङ्गस्य स्थानान्तरं कृतम् इति दृश्यते। शिखरस्य अधः वा पार्श्वे अपसारितम् इति अस्ति यवनानाम् आक्रमणात् शिवलिङ्गस्य रक्षणार्थं मूललिङ्गं गोपयित्वा तत्स्थाने अन्यत् लिङ्गं स्थापितम् इति श्रूयते एतत् लिङ्गं परितः सर्वदा जलं स्थितं भवति।

''ओङ्कारबिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः
कामदं मोक्षदं चैव ओङ्काराय नमो नमः॥''

**केदारनाथः -**



भारतस्य उत्तराखण्डराज्ये रुद्रप्रयागजनपदान्तर्गते केदारनामके पर्वते इदं लिङ्गं विराजते। हिन्दुधर्मे चतुर्षु यात्रातीर्थेषु केदारनाथः प्रमुखस्थानम् अलङ्करोति विषमवातावरणकारणात् अप्रैलमासादारभ्य नवम्बरमासं यावत् मन्दिरस्य दर्शनं जायते।

महाभारतकालीनैः पाषाणैः कत्यूरीशैल्यां मन्दिरनिर्माणम् अजायत। पुरातनीयं मन्दिरमिदं शैवतीर्थेषु प्रमुखताम् अलङ्करोति।

अस्य मन्दिरस्य निर्माणं पुरा केन कृतम् ? इति स्पष्टज्ञानाभावः दृश्यते। समयान्तरे मन्दिरस्य जीर्णोद्धारः अभवत्। साम्प्रतकालीनमन्दिरस्य निर्माणम् आदिगुरुशङ्कराचार्येण कृतं वर्तते।

अस्य मन्दिरस्य ऐतिहासिकप्रमाणं न प्राप्यते, किन्तु सहस्रवर्षैः सनातनसंस्कृतेः आस्थास्थानं वर्तते।

**किंवदन्ती -**

यदा महाभारतस्य युद्धं पूर्णं जातं तदानीन्तने काले पाण्डवैः महाविनाशस्य कारणं स्वात्मानं मन्यते, ते स्वपारिवारिकजनानां संहारस्य पापात् जीवनं यापितुं न शक्नुवन्ति, अतः गुणीजनवचनानि अनुसृत्य वेदव्यासस्य समीपं

पापमुक्त्यर्थं गताः। वेदव्यासैः केदारकन्दरायां शिवाराधनया पापमुक्तेः मार्गः सूचितः आसीत्।

पाण्डवाः शिवकृपाप्राप्तये विश्वनाथस्य दर्शनार्थं निर्गताः किन्तु पाण्डवात् रुष्टः शिवः तेभ्यः दर्शनं नायच्छत्। अत एव ते केदारकन्दरां प्रत्यागच्छन्तः आसन् तान् दृष्ट्वा पुनः गुप्तकाश्यां शिवः लुप्तः अभवत्।

तदनन्तरं महिषरूपं धृत्वा पाण्डवानां समीपे आगतवान्। भीमः महिषं दृष्ट्वा तस्य पुच्छभागम् आलम्बितवान्। सः महिषस्वरूपः नेपालदेशे पशुपतिनाथरूपेण स्थितः वर्तते। पृष्ठभागः केदारनाथरूपेण प्रसिद्धः वर्तते।

**भीमाशङ्करः -**



सह्याद्रीपर्वते विद्यमानं लिङ्गं भीमाशङ्करः इति नाम्ना प्रसिद्धः अस्ति। शिवपुराणे अस्य एका कथा श्रूयते-प्राचीनकाले भीमनामकः प्रतापी राक्षसः आसीत्। सः कामरुप्रदेशे वसति स्म। राक्षसराजरावणस्य अनुजस्य पुत्रोऽयं वर्तते। किन्तु कदापि सः पितरं न मिलितवान्। कारणं पुरुषोत्तमरामैः हतः कुम्भकर्णः। तेन कारणेन क्रुद्धः सः तपस्याम् अकरोत्। सहस्रवर्षस्य कठिनतपसा फलं प्राप्य मर्त्यलोके अधर्मस्य प्रचारः कृतः। तेन शिवभक्तसुदक्षिणं पराजितः। अतः भक्तवत्सलः सदाशिवः धर्मरक्षणाय सज्जः अभवत्। कारागृहे सुदक्षिणेन शिवार्चनाय पार्थिवलिङ्गस्य स्थापना कृता। राक्षसः एतत् कृत्यम् अवलोक्य लिङ्गं प्रहरति तदानीं काले लिङ्गात् एका ज्योतिः निर्गता। ज्योतेः प्रभावात् राक्षसः हतः तदनन्तरं भीमानद्याः तटे एतस्य लिङ्गस्य स्थापना अभवत्।

**ज्योतिर्लिङ्गस्य महत्त्वम् -**

भारतीयसनातनसंस्कृत्यां ज्ञानस्य महत्त्वम् अत्यधिकं वर्तते। विविधक्षेत्रेषु विद्यामानानि इमानि लिङ्गानि सनातनसंस्कृतेः गौरवपूर्णेतिहासस्य आधिपत्यं स्वीकुर्वन्ति। किन्तु एकः प्रश्नः समुद्भवति यद् लिङ्गानां सङ्ख्या केन कारणेन द्वादश एव ?

कारणम् अस्माकं शास्त्रे द्वादशसङ्ख्यायाः अधिकं महत्त्वं वर्तते।

तैत्तिरीयोपनिषदि ब्रह्मणः द्वादशसिद्धान्ताः निर्दिष्टाः सन्ति।

''मायाजीवात्माबुद्धिसुषुप्तमनस्मितापञ्चमहाभूतानाम्'' आत्मज्ञानाय द्वादशलिङ्गानि सन्ति।

''विद्याकामस्तु गिरीशम् यजेत।''

ज्ञानप्राप्तये शिवाराधना एव वरम्।

इमानि लिङ्गानि आत्मज्ञानप्रकाशकानि सन्ति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।**

(१) ......... लिङ्गानि सन्ति ? (११, १२, १०)

(२) भीमाशङ्करः ......... नदीतटे वर्तते ? (भीमा, नर्मदा, कावेरी)

(३) महिषरूपं धृत्वा ......... आगतवान् ? (रामः, कृष्णः, शिवः)

(४) केदारनाथः ......... राज्ये अस्ति ? (गोवायाम्, गुजराते, उत्तराखण्डे)

(५) ओङ्कारेश्वरः ......... राज्ये वर्तते ? (मध्यप्रदेशे, गुजराते, राजस्थाने)

(६) ओङ्कारेश्वरः ......... नदीतीरे विराजते ? (नर्मदा, यमुना, गङ्गा)

(७) शङ्कराचार्येण ......... स्थाने मन्दिरनिर्माणं कृतम् ? (सोमनाथ, केदारनाथ, वैद्यनाथ)

(८) ......... ज्योतिर्लिङ्गो लिङ्गद्वयम् वर्तते ? (ओङ्कारेश्वरे, भीमाशङ्करे, वैद्यनाथे)

(९) चतुर्षु यात्रातीर्थेषु ......... प्रमुखं स्थानं वर्तते। (बद्रिनाथस्य, केदारनाथस्य, सोमनाथस्य)

(१०) ......... युद्धे पारिवारिकजानानां हत्यादोषात् त्रस्ताः ? (पाण्डवाः, यादवाः, कौरवाः)

**२. एकेन वाक्येन उत्तराणि लिखन्तु।**

(१) विद्याकामाय कं यजेत ?

(२) कत्यूरीशैल्यां कुत्र निर्माणम् अजायत ?

(३) भीमनामकस्य राक्षसस्य पिता कः आसीत् ।

(४) भीमराक्षसात् कः पराम्बभूव ?

(५) सुदक्षिणेन कस्य स्थापना कृता ?

(६) ओङ्कारस्य स्थापनां कः अकरोत् ?

(७) कस्य क्षेत्रस्य नाम मान्धाता वर्तते ?

(८) के मन्दिरे आक्रमन्ति ?

(९) पशुपतिनाथः कुत्र वर्तते ?

**३. टिप्पणीं लिखन्तु।**

(१) ओङ्कारेश्वरस्य इतिहासं प्रतिपादयत ।

(२) केदारनाथस्य किंवदन्तीं लिखन्तु।

**४. सविस्तरम् उत्तरं लिखन्तु।**

(१) ज्योतिर्लिङ्गस्य महत्त्वं प्रतिपादयन्तु।

(२) भीमराक्षसस्य वृत्तान्तं वर्णयन्तु।

## ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) अहल्याबाई | (१) द्वादश |
| (२) शङ्कराचार्यः | (२) ज्ञानं |
| (३) ब्रह्म | (३) ओङ्कारेश्वरः |
| (४) भीमानदी | (४) ओङ्कारेश्वरः |
| (५) नर्मदानदी | (५) भीमाशङ्करः |

### छात्रप्रवृत्तिः

- शिक्षकस्य मार्गदर्शनानुसारं छात्राः द्वादशलिङ्गानाम् उपलिङ्गानां संशोधनं करिष्यन्ति तथा लघुपरिचयं लेखिष्यन्ति।

### सुभाषितम्

**''अनुत्तरं महासंवीत्**
**श्रौतःस्वच्छन्दचारिणे।**
**परिपूर्णानन्दनाथाय**
**शिवाय गुरवे नमः॥''**

●

| ४ | # अस्माकम् आचार्याः |
|---|---|

## प्रस्तावना

'धन्याधरेयं मम भारतस्य' इति पुण्यभूमौ भारतवर्षे नैके महापुरुषाः भगवत्-तत्त्वम् अवाप्तुं लोकहिताय च स्वजीवनं समर्पितवन्तः। अस्मिन् ज्ञानमार्गे महर्षि-वेदव्यासरचित-ब्रह्मसूत्रग्रन्थः अग्रेसरः वर्तते। तदनु आचार्यपरम्परा प्रचलिता। भारते विविधप्रान्तेषु जातानां ज्योतिर्धराणामाचार्याणामत्र अध्ययनं भविष्यति। तेषु जगद्गुरुशङ्कराचार्य मध्वाचार्यनिम्बार्काचार्यरामानन्दाचार्यवल्लभाचार्यप्रभृतीनाम् अस्माकम् आचार्याणामत्र समावेशः कृतः वर्तते।

## जगद्गुरुः शङ्कराचार्यः



आदिगुरोः शङ्कराचार्यस्य जन्म केरलप्रान्ते कालडीनामके ग्रामे वैशाखशुक्लपञ्चम्याम् अभवत्। तस्य पिता शिवगुरुः तथा च माता आर्याम्बा आसीत्। बाल्यकाले एव शङ्करः वेद-शास्त्रेषु निपुणतां प्राप्नोत्।

शङ्करः यदा वर्षत्रयस्य बालः आसीत्, तदा तस्य पिता दिवंगतः। अतः माता आर्याम्बा एव शङ्करस्य पालनमकरोत्। आशैशवात् एव तस्य मनः विरक्तम् आसीत्। विरक्तः शङ्करः मातुः अनुमतिं लब्ध्वा अष्टमे वर्षे संसारं त्यक्त्वा संन्यासी अभवत्।

श्रेष्ठं गुरुं प्राप्तुं पदयात्रां कुर्वन् सः नर्मदातटम् आगतवान्। तत्र गोविन्दभगवत्पादात् संन्यासदीक्षां प्राप्तवान्। अत्रैव सः उपनिषदाम्, ब्रह्मसूत्राणाम्, श्रीमद्भगवद्गीतायाः च भाष्याणि अरचयत्। तेन विरचितानि बहूनि स्तोत्रकाव्यानि सन्ति, येषु चर्पटपञ्जरिका स्तोत्रम् अतीव- लोकप्रियमस्ति।

षोडशे वर्षे भाष्याणां रचना तस्य अपूर्वायाः मेधायाः प्रमाणम् अस्ति। बुद्धेः तीक्ष्णता, विचाराणां गौरवम्, भावगाम्भीर्यम्, मनसः दृढता इत्येतत् सर्वं तस्य वैशिष्ट्यम् आसीत्। सनातनधर्मस्य पुनः स्थापनं कृत्वा विश्वबन्धुत्वस्य उपदेशं प्रसार्य तेन समाजे शान्तिः, सद्भावना च प्रसारिता। सर्वत्र परिभ्रमन् सः जनेभ्यः अद्वैतवेदान्तसिद्धान्तस्य ज्ञानमुपदिष्टवान्। अस्मिन्नेव प्रचारक्रमे तेन चत्वारः मठाः-शृङ्गेरीमठः, गोवर्धनमठः, शारदामठः, ज्योतिर्मठः इत्याख्याः मठाः स्थापिताः।

| मठः | स्थानम् |
|---|---|
| (१) गोवर्धनमठः | जगन्नाथपुरम् (पूर्वप्रान्ते, उडीसाप्रदेशे) |
| (२) शारदामठः | द्वारिकास्थानम् (पश्चिमप्रान्ते, गुजरातप्रदेशे) |
| (३) ज्योतिर्मठः | बद्रीनाथस्थानम् (उत्तरप्रान्ते, उत्तराखण्डप्रदेशे) |
| (४) शृङ्गेरीमठः | मैसूरस्थानम् (दक्षिणप्रान्ते, कर्नाटकप्रदेशे) |

जगद्गुरुः आदिशङ्कराचार्यः समग्रविश्वस्य एकः विरलः विभूतिः आसीत्। सः महान् दार्शनिकः, कविः, पण्डितः सन् अपि च समाजपरिमार्जकः स्वयं भगवतः शिवस्य अवतारः आसीत्। हिन्दुसनातनधर्मस्य पुनः स्थापनं कृत्वा द्वात्रिंशत् वर्षाणि यावत् अल्पायुः समाप्य जीवनध्येयं पूर्णं कृत्वा हिमालयं गत्वा सः स्वजीवनलीलां समापयामास।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

**मध्वाचार्यः**



मध्वाचार्यः वेदान्तशास्त्रस्य प्रवर्तकः आसीत्। 'आनन्दतीर्थः' इति तस्य अपरं नाम। आचार्यस्य जन्म १२३८ तमे वर्षे कर्णाटकराज्यस्य उडुपीमण्डलस्य पाजकक्षेत्रे अभवत्। मध्वाचार्यः मध्यगेहभट्ट-वेदवती इति दम्पत्योः पुत्रः। पितरौ बालस्य 'वासुदेव' इति नामकरणं कृतवन्तौ। ११ वर्षीयो वासुदेवः संन्यासं स्वीकृतवान्। अयं वासुदेवः 'अच्युतप्रज्ञ' इति आचार्यात् नामदीक्षां स्वीकृतवान्। आचार्यः अच्युतप्रज्ञः वासुदेवाय 'पूर्णप्रज्ञ' इति नाम दत्तवान्। तस्य अगाधं पाण्डित्यं दृष्ट्वा आचार्यः 'आनन्दतीर्थः' इति अपरं नाम दत्तवान्। किन्तु आचार्यः मध्वः तु 'मध्व' इति नाम्ना एव प्रसिद्धः।

भारतस्य दर्शनशास्त्रेषु 'द्वैतं' प्रमुखं विशिष्टं च शास्त्रं वर्तते। तस्य शास्त्रस्य प्रवर्तकः मध्वाचार्यः। स्पष्ट-सुललित-व्याख्यानमेव मध्वाचार्यस्य पाण्डित्यस्य विशेषता। एवं वेदस्य अर्थत्रयम्, महाभारतस्य दशार्थम्, विष्णुसहस्रनाम्नः शतार्थम् प्रदर्श्य 'विश्वम्' इति पदस्य पञ्चदशाधिकार्थान् प्रतिपादितवान् आचार्यः इति तु मध्वाचार्यस्य पाण्डित्यं द्योतयति।

मध्वाचार्यस्य विविधाः कृतयः सन्ति। तेषु ब्रह्मसूत्रभाष्यम्, अणुभाष्यम्, गीताभाष्यम्, गीतातात्पर्यम्, दशोपनिषद्भाष्यम्, ऋग्भाष्यम् इत्यादयः मुख्याः।

मध्वाचार्यस्य शिष्याः नैके आसन्। शास्त्र-संरक्षणार्थं शास्त्रप्रचारार्थम् एवं मध्वाचार्येण प्रतिष्ठापितस्य श्रीकृष्णस्य आराधननिर्वहणाय च एते शिष्याः नियुक्ताः।

**निम्बार्काचार्यः**



श्रीकृष्णस्य उपासनं स्थापितवत्सु वैष्णवाचार्येषु निम्बार्काचार्यः प्राचीनतमः वर्तते। राधा-कृष्णयोः युगलोपासनायाः स्थापनकर्तुः निम्बार्काचार्यस्य जन्म कार्तिकपूर्णिमातिथौ अभवत्। अस्य आचार्यस्य जन्म वैदुर्यपत्तनस्य (दक्षिणकाशी) अरुणनामके आश्रमे अभवत्। निम्बार्काचार्यस्य पिता अरुणमुनिः माता च जयन्ती आसीत्। पूर्वाश्रमे आचार्यस्य नाम 'नियमानन्दः' आसीत्। बाल्यादेव पितृभ्यां सह व्रजस्थलं नियमानन्दः स्वसाधनास्थलं कृतवान्।

एकदा नियमानन्दस्य आश्रमे दिवाभोजी एकः यतिः आगतवान्। यतिना सह शास्त्रचर्चायां सूर्यास्तः जातः यतिः भोजनं विना गन्तुम् उद्यतः। तदा बालकेन नियमानन्देन निम्बवृक्षं प्रति संकेतं कृत्वा प्रदर्शितं यत् अधुना सूर्यास्तः नाभवत् अतः भवान् भोजनं कृत्वा एव गच्छतु। यतिः यदा भोजनं कृत्वा गन्तुं तत्परः अभवत् तदा एव ज्ञातं यत् रात्र्याः द्विप्रहरात्मकः समयः व्यतीतः। यतेः रूपं धृत्वा आगतवान् ब्रह्मा नियमान्दं कथयति-'भवता निम्बवृक्षस्योऽपरि स्वतेजः प्रदर्शितम्, अतः 'निम्बार्क' (निम्ब + अर्कः) इति नाम्ना भवान् प्रसिद्धः भविष्यति।'

निम्बार्काचार्यः सुप्रसिद्धः दार्शनिकः आसीत्। अयम् आचार्यः द्वैताद्वैतदर्शनं प्रतिपादितवान्। आचार्यस्य निम्बार्कस्य ग्रन्थसम्पदः इत्थं वर्तते-वेदान्तपारिजातसौरभम्, वेदान्तकामधेनुदशश्लोकी, गीतावाक्यार्थम्, सदाचारप्रकाशः इत्यादयः।

तथा च निम्बार्काचार्येण ब्रह्मसूत्राणाम्, उपनिषदाम्, श्रीमद्भगवद्गीतायाः च उपरि स्वटीकां रचयित्वा स्वमतः प्रतिपादितः दृढीकृतः च।

पूर्वराष्ट्रपतिना डॉ. सर्वपल्लीराधाकृष्णन्महोदयेन स्वस्य सुप्रसिद्धे 'भारतीयदर्शन' नामके ग्रन्थे लिखितं वर्तते यत् निम्बार्काचार्यस्य मतेन भक्तियुक्तं कर्म एव ब्रह्मज्ञानप्राप्तेः साधनम् अस्ति इति।

### रामानन्दाचार्यः



रामानन्दाचार्यः महान् क्रान्तिकारी महात्मा आसीत्। कान्यकुब्जब्राह्मणकुले आचार्यस्य जन्म अभवत्। धार्मिकेन रामानन्देन काशीस्थे श्रीमठस्थाने शिक्षा प्राप्ता बाल्यादेव वेद-पुराण-धर्मग्रन्थानाम् अध्ययनं कृत्वा सः प्रकाण्डः विद्वान् अभवत्।

सः युवावस्थायां दक्षिणभारतस्य श्रीसम्प्रदायस्य गुरुराघवानन्दात् दीक्षां प्राप्तवान्। स्वल्प एव काले रामानन्दः श्रीसम्प्रदायस्य शीर्षस्थमहात्मारूपेण प्रसिद्धः अभवत्। अनन्तरम् उत्तरभारते वाराणसीं स्वकार्यकेन्द्ररूपेण स्वीकृत्य नूतनविचाराणां प्रसारार्थं कार्यरतः अभवत्।

रामानन्दाचार्येण श्रीसम्प्रदायस्य विशिष्टाद्वैतदर्शनं प्रपत्तिसिद्धान्तं च आधारीकृत्य रामावतसम्प्रदायस्य स्थापना कृता। अनेन आचार्येण प्रस्थानत्रय्याः उपरि विशिष्टाद्वैतसिद्धान्तानुगुणं स्वतन्त्रम् 'आनन्दभाष्यम्' रचितम्।

आचार्यस्य उपदेशं स्वीकृत्य अनुयायिनः भक्ताः रामानन्दसम्प्रदायं प्रारभन्त।

रामानन्दाचार्यस्य मतानुसारं भक्तिः एव मोक्षप्राप्त्यर्थं श्रेष्ठं साधनम् अस्ति। जीवात्मा स्वयमेव ईश्वरकृपां विना संसारात् मुक्तिप्राप्तये अशक्तः। ईश्वरः जीवं प्रति अपत्यभावं धारयति कल्याणं च साधयति।

मध्ययुगस्य धर्मसाधनायाः केन्द्रस्थाने स्थितस्य रामानन्दाचार्यस्य स्थानं चतुष्पथस्य दीपस्तम्भः इव दृश्यते। आचार्यस्य अभूतपूर्वायाः सामाजिकक्रान्त्याः कारणेन एव अस्माकं संस्कृत्याः तीर्थानां च रक्षणम् अभवत् इति सर्वैः स्वीकृतम्।

### वल्लभाचार्यः -



वल्लभाचार्यः 'वल्लभः' इत्यपि ख्यातः। सः कृष्णाश्रितं पुष्टिमार्गं व्रजप्रदेशे प्रख्यापितवान्। तस्य सिद्धान्तः शुद्धाद्वैतः अस्ति। वल्लभाचार्यः तेलुगुब्राह्मणकुटुम्बे जन्म प्राप्तवान्। तस्य पितरौ विधर्माणाम् आक्रमणकारणतः वाराणसीतः चम्पारण्यम् आगतौ। संवत् १५३५ तमे वर्षे लक्ष्मणभट्टस्य पुत्रत्वेन वल्लभाचार्यः वैशाखकृष्ण एकादश्यां चम्पारण्ये जातः। तस्य माता इलम्मा आसीत्। वल्लभः बाल्यकाले एव वेदान्, उपनिषदः च पठित्वा, ततः २० (विंशतिः) वर्षाणि यावत् आभारतम् अटितवान्। सः पुष्टिमार्गस्य प्रवर्तकः आसीत्। वेदान्ततत्त्वात् स्वयं ज्ञानं प्राप्य सः पुष्टिमार्गम् आरब्धवान्। कृष्णस्य उपासनया गृहस्थोऽपि मोक्षं प्राप्तुं शक्नोति इति प्रत्यपादयत्।

वल्लभाचार्यः अनेकान् ग्रन्थान् अरचयत्। तेषु ब्रह्मसूत्रभाष्यस्य अणुभाष्यम्, षोडशग्रन्थाः, भागवतस्योऽपरि सुबोधिनी टीका च प्रसिद्धा। वल्लभाचार्यस्य कीर्तनानि बालकृष्णस्य यशोदायाः च माहात्म्यं वर्णयन्ति। वल्लभाचार्यसम्बद्धानि वस्तूनि व्रजप्रदेशे नाथद्वारा इत्यत्र सङ्गृहीतानि सन्ति।

वल्लभाचार्यः संन्यासी भवितुम् इष्टवान्। परन्तु पण्ढरपुरस्य पाण्डुरङ्गः श्रीनाथः च तं गृहस्थं भवितुं सूचितवन्तौ। अतः वल्लभाचार्यः महालक्ष्मीं परिणीय गोपीनाथं विठ्ठलनाथं च पुत्रत्वेन प्राप्तवान्।

वल्लभाचार्यः आभारते पादरक्षाम् अपि अधृत्वा अटनम् अकरोत्। श्वेतवेष्टीं श्वेतोत्तरीयं च धरति स्म। सः ८४ (चतुरशिति) स्थलेषु भागवतविषये व्याख्यानानि कृतवान्। एतानि ८४ (चतुरशिति) स्थलानि पुष्टिमार्गस्य धार्मिकक्षेत्राणि बेठकजी विद्यन्ते।

द्विपञ्चाशत्तमे वयसि वाराणस्यां हनुमान् स्नानघट्टे वल्लभाचार्यस्य जलसमाधिः अभवत्।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) आदिगुरोः शङ्कराचार्यस्य जन्म ......... प्रान्ते अभवत्। (कर्णाटक, केरल, उत्तराखण्ड)

(२) 'आनन्दतीर्थः' इति अपरं नाम ......... आचार्यस्य आसीत्। (वल्लभाचार्यस्य, मध्वाचार्यस्य, निम्बार्काचार्यस्य)

(३) निम्बार्काचार्यस्य ग्रन्थः ......... वर्तते। (वेदान्तकामधेनुः, गीतातात्पर्यम्, आनन्दभाष्यम्)

(४) ......... आचार्यः गुरुणा राघवानन्दात् दीक्षां प्राप्नोत्। (निम्बार्काचार्यः, रामानन्दाचार्यः, वल्लभाचार्यः)

(५) वल्लभाचार्यः ......... वर्षाणि यावत् आभारतम् अटितवान्। (विंशतिः, अष्टादश, एकविंशतिः)

(६) आशैशवात् ......... मनः विरक्तम् आसीत्। (शङ्कराचार्यस्य, वल्लभाचार्यस्य, रामानन्दस्य)

(७) ......... वर्षीयः वासुदेवः संन्यासं स्वीकृतवान्। (द्वादश, एकादश, पञ्चदश)

(८) पूर्वाश्रमे ......... नाम 'नियमानन्दः' आसीत्। (निम्बार्काचार्यस्य, रामानन्दाचार्यस्य, वल्लभाचार्यस्य)

(९) रामानन्देन ......... श्रीमठस्थाने शिक्षा प्राप्ता। (चम्पारण्यस्थे, काशीस्थे, व्रजस्थे)

(१०) कृष्णस्य उपासनया गृहस्थोऽपि मोक्षं प्राप्तुं शक्नोति इति ......... प्रत्यपादयत्।

(वल्लभाचार्यः, शङ्कराचार्यः, निम्बार्काचार्यः)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) कः आचार्यः चर्पटपञ्जरिकास्तोत्रस्य रचयिता अस्ति ?

(२) मध्वाचार्यः 'विश्वम्' पदस्य कति अर्थान् प्रतिपादितवान् ?

(३) नियमानन्दस्य आश्रमे कीदृशः यतिः आगतवान् ?

(४) रामानन्दाचार्यस्य मतानुसारं मोक्षप्राप्त्यर्थं श्रेष्ठं साधनं किम् अस्ति ?

(५) वल्लभाचार्येण सम्बद्धानि वस्तूनि कुत्र सङ्गृहीतानि सन्ति ?

(६) आदिगुरुः शङ्कराचार्यः गुर्जरप्रान्ते कं मठं स्थापितवान् ?

(७) चतुष्पथस्य दीपस्तम्भः इव कस्य आचार्यस्य स्थानं दृश्यते ?

(८) शङ्कराचार्यः ब्रह्मसूत्रभाष्यं कस्मिन् स्थाने अरचयत् ?

(९) मध्वाचार्येण विष्णुसहस्रनाम्नः कति अर्थाः प्रतिपादिताः ?

(१०) 'भारतीयदर्शनम्' नामकः ग्रन्थः कस्य वर्तते।

### ३. टिप्पणीं लिखन्तु।

(१) मध्वाचार्यस्य साहित्यम्। (२) चत्वारः मठाः।

(३) निम्बार्काचार्यस्य साहित्यम्। (४) वल्लभाचार्यस्य रचनाः।

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) शङ्कराचार्यस्य जीवनकार्यं विस्तरेण दर्शयत।

(२) 'रामानन्दाचार्यः महान् क्रान्तिकारी महात्मा आसीत्' इति सिद्धं कुरुत।

(३) वल्लभाचार्यस्य परिचयः सविस्तरः देयः।

(४) निम्बार्काचार्यस्य जीवनकवनं विस्तरेण वर्णयन्तु।

### ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) शङ्कराचार्यः | (१) शुद्धाद्वैतसिद्धान्तः |
| (२) वल्लभाचार्यः | (२) द्वैताद्वैतदर्शनम् |
| (३) मध्वाचार्यः | (३) अद्वैतवेदान्तसिद्धान्तः |
| (४) निम्बार्काचार्यः | (४) द्वैतसिद्धान्तः |
| (५) रामानन्दाचार्यः | (५) विशिष्टाद्वैतदर्शनम् |

**छात्रप्रवृत्तिः**

- ग्रन्थालयमाध्यमेन विविधमठानाम्, आचार्यस्थानानां आवश्यकान् बिन्दून् लिखन्तु।

**सुभाषितम्**

**सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥**

●

# ५ भारतस्य क्रान्तिवीराः

## प्रस्तावना

अस्माकं भारतदेशः १५ अगस्त, १९४७ तमे दिनाङ्के स्वतन्त्रतां प्राप्तवान्। तत्पूर्वं देशोऽयम् अन्यदेशवासिजनैः आक्रान्तः परतन्त्रताञ्च गतश्चासीत्। अतः तस्मिन् समये तेभ्यो स्वतन्त्रतां प्राप्तुम् अनेकैः क्रान्तिवीरैः भारतमातुः रक्षणार्थं स्वतन्त्रताप्राप्त्यै च बलिदानं प्रदत्तमासीत्। अतः प्रवर्तमानसमये वयं स्वतन्त्रतामनुभवामः। एषु क्रान्तिवीरेषु बलिदानी (शहीद) भगतसिंहः, चन्द्रशेखरः आझादः, रामप्रसादः बिस्मिल्लः तथा च अशफाकः उल्लाहखानः सविशेषरूपेण स्मर्यन्ते। एतेषां बलिदानं सर्वेषां भारतीयानां कृते प्रेरणादायकं वर्तते। तदत्र प्रस्तुतमस्ति।

## चन्द्रशेखरः आजादः



चन्द्रशेखरः आजादः भारतीयस्वतन्त्रतासङ्ग्रामस्य स्वातन्त्र्यसेनानी आसीत्। अस्य जन्म २३ जुलै, १९०६ तमे दिनाङ्के मध्यप्रदेशस्य झाबुआ मण्डले भावरा (चन्द्रशेखर-आझाद-नगरम्) नामके ग्रामे जातम्। अस्य संपूर्णम् नाम चन्द्रशेखरः सीतारामः तिवारी आसीत्। मातुः नाम जागरानीदेवी आसीत्। मातृभूमेः स्वातन्त्र्ये १९२१ तमे ईस्वीयाब्द असहकारान्दोलनसमये न्यायालये न्यायाधीशः तस्मै तस्य नाम पृष्टवान्। तदा सः उक्तवान् मम नाम आजादः वर्तते। मम पितुः नाम स्वाधीनता वर्तते। तदनन्तरं स्वतन्त्रतासङ्ग्रामे सः चन्द्रशेखरः आजादः इति नाम्ना जनमानसे ख्यातिं प्राप्तवान्।

अस्य प्रारंभिकजीवनं आदिवासी-बाहुल्य-क्षेत्र-स्थित-भावरा नामके ग्रामे व्यतीतम्। तत्र आदिवासिभिस्सह धनुर्बाणचालनशिक्षा प्राप्ता। तदनु सः भारतमातुः स्वातन्त्र्यार्थं सशस्त्रक्रान्तिं प्रति मनश्चकार। तस्मिन् समये बनारसः (वाराणसी) क्रान्तिकारिणां मुख्य-केन्द्रमासीत्। तत्र मन्मथनाथः गुप्तः एवञ्च प्रणवेशः चेटर्जी इत्यनयोः सम्पर्केण क्रान्तिकारीदलस्य सभ्यः अभवत्। क्रान्तिकारिणामिदं दलं हिन्दुस्तानी-प्रजा-तान्त्रिक-संघः (हिन्दुस्तान रिपब्लिकन एसोसियेशन) इति नाम्ना विख्यातमासीत्। अस्य दलस्य स्थापना १९२४ तमे ईस्वीयाब्दे जाता। अस्य प्रमुखनेतारः रामप्रसाद बिस्मिल्लः, शचीन्द्रनाथ सान्यालः तथा च योगेशचन्द्रः चेटर्जी आसन्।

अस्य सङ्घस्य नीत्यनुसारं काकोरीकाण्ड नामिकी एका योजना घटिता। तस्यां योजनायां भारतीयस्वातन्त्र्यसंग्रामस्य क्रान्तिकारिभिः ब्रिटिशशासनविरुद्धं भयंकरं युद्धं कर्तुम्, शस्त्राणि क्रेतुम् धनावश्यकतापूर्त्यर्थं ब्रिटिश-सर्वकारस्यैव सम्पत्ति-लुण्ठनस्य आयोजनं कृतम्। तदनुसारं काकोरीरेलयानस्थानकात् (काकोरि रेल्वे स्टेशन)गम्यमानं एकं रेलयानं लुण्ठितम्। इयं घटना संङ्घस्य नीत्यनुसारं ९/८/१९२५ तमे दिनाङ्के जाता। अनया घटनया आङ्लप्रशासकाः आघातमनुभूयमानाः आसन्। इमां घटनां-लक्ष्यीकृत्य न्यायालये वाद-प्रवादः प्रचलितः, तदा अन्तिम-निर्णये न्यायाधीशः अशफाकः उल्लाहखानः, पं. रामप्रसादः बिस्मिल्लः, राजेन्द्रनाथ लाहिडी, ठाकुरः रोशनसिंहः इत्येभ्यो चतुर्भ्यो मृत्युदण्डं प्रदत्तवान्। तथान्यक्रान्तिवीरेभ्यः आजीवनकारावासशिक्षां दत्तवान्।

अनया घटनया व्यथितः भूत्वा चन्द्रशेखरः आझादः ८/९/१९२८ तमे दिनाङ्के दिल्लीनगरस्थिते फिरोजशाह कोटला क्रीडाङ्गणे एकां गुप्तसभां समायोजितवान्। तत्र सर्वे क्रान्तिकारिणः आवाहिताः समागताश्चासन्। तत्र पर्याप्त-विचारविमर्शानन्तरं मतैक्येनास्य दलस्य नामपरिवर्तनं कृत्वा 'हिन्दुस्तान सोशलिस्ट रिपब्लिकन एसोसियेशन' इति कृतम्। तस्मिन् चन्द्रशेखरः आझादः सेनाप्रमुखस्य दायित्वं स्वीकृतवान्। तथा च भगतसिंहाय दलस्य प्रमुखप्रचारकस्य दायित्वं प्रदत्तमासीत्। तत्र निर्णीतं यत् अस्माकं संग्रामः अन्तिमनिर्णयं यावत्-अनवरतं प्रचलिष्यते। अत्र-एकमेवोद्देश्यमासीत् ''कार्यं वा साधयेयं देहं वा पातयेयम्'' इति।

अपरं भगतसिंह:, राजगुरु: एवं सुखदेव: एतै: संसदभवनविस्फोटककाण्डमध्ये मृत्युदण्ड: प्राप्त: तदा तं दण्डम् आजीवनकारावासदण्डरूपेण परिवर्तयितुं चन्द्रशेखर: आझादेन बहुश: प्रयास: कृत: आसीत्।

एकदा अल्फ्रेडपार्कमध्ये स्वमित्राभ्यां सुखदेवराजगुरुभ्यां सह आजाद: मन्त्रणां कुर्वन्नासीत् तदा तत्र गुप्तरक्षकाधिकारी (सी.आई.डी.) एस.एस.पी. नोट् बाबर: स्वरक्षकै: साकं तत्र समागतवान् तदनु-उभयपक्षे भयङ्करं युद्धं जातम्। तस्मिन् काले स्वतन्त्रता सिद्धये एवं आत्मगौरवाय स्वस्य भुशुण्ड्या स्वस्योऽपरि प्रहारं कृत्वा वीरगतिं प्राप्त:। इयं दु:खदघटना २७/२/१९३१ तमे दिनाङ्के जाता।

अयं वीरपुरुष: भारतमातु: स्वातन्त्र्यार्थं रक्षणार्थं च स्वबलिदानं प्रदत्तवान्। एतादृशै: अनेकक्रान्तिवीरै: भारतमातु: कृते स्वबलिदानं प्रदत्तं तदितिहासेऽङ्कितं वर्तते।

### भगतसिंह:



सरदार: भगतसिंह: स्वातन्त्र्यसेनानी आसीत्। भारतस्य स्वतन्त्रतासङ्ग्रामे तस्य मुख्यभूमिका आसीत्।

भगतसिंहस्य जन्म २८/९/१९०७ तमे दिनाङ्के पञ्जाबप्रान्तस्य लामेकपुर मण्डले बङ्गा नामकग्रामे (प्रवर्तमानसमये एतद्ग्राम: पाकिस्तानदेशेऽस्ति) देशभक्तशिखपरिवारे अभवत्। तस्य पितु: नाम सरदार: किशनसिंह: एवं मातु: नाम विद्यावतीकौर आसीत्।

भगतसिंहस्य जन्मसमये तस्य-पिता सरदारकिशनसिंह: एवं तस्य पितृव्यौ अजितसिंहकर्णसिंहौ ब्रिटिशराजस्य-विरोधकारणेन कारागारे आस्ताम्। यदा भगतसिंहस्य जन्म जातं तस्मिन्नेव दिवसे स्वपितापितृव्यानां कारागारात् मुक्तिर्जाता। अत: तस्मिन् समये भगतसिंहस्य गृहे आनन्दस्य वातावरणमासीत्।

भगतसिंहस्य जन्मसमये तस्य पितामह्या तस्य नाम 'भागोवाला' अर्थात् भाग्यवान्-इति निर्धारितमासीत्। तदनु सर्वे तं भगतसिंह: इति नाम्ना आह्वयन्ति स्म।

अयं भगतसिंह: चतुर्दशवर्षात्मक: भूत्वा पञ्जाबप्रान्तस्य क्रान्तिकारीसंस्थाभिस्सह कार्यं कुर्वाण: आसीत्। डी.ए.वी. विद्यालयात् नवमकक्षां उत्तीर्य १९२३ ईस्वीयाब्दे इंटरमीडिएट् इत्यस्य परीक्षामुत्तीर्णवान्। तदनु तस्य परिवार: तं विवाहबन्धने संयोजयितुं प्रयत्नं चकार। अपि तु स: लाहोरं परित्यज्य कानपुरमध्ये समागतवान्। तत: स: भारतस्य स्वातन्त्र्यसंग्रामे स्वकीयं संपूर्णं योगदानं - बलिदानञ्च प्रदत्तवान्।

तेन ससाहसं ब्रिटिशसर्वकारस्य प्रतिकार: कृतश्चासीत्। स: सर्वदा नवयुवकाणां कृते आदर्शभूत: आसीत्, वर्तते, भविष्यति च। भगतसिंह: हिन्दी, उर्दु, पञ्जाबी एवञ्चाङ्गलभाषाया: ज्ञाता आसीत्। कारागारे लिखितपत्रेभ्य: लेखेभ्य: तस्य विचारा: ज्ञायन्ते तत्र भारतीयभाषा, जाति: एवञ्च धर्मस्य कारणेन समाजे समागतान्तराले स्वदु:खं प्रकटितमासीत्।

अमृतसरप्रान्ते १३/४/१९१९ तमे दिनाङ्के जातया 'जलियावालाबाग हत्याकाण्डम्' इति घटनया दु:खतप्तस्य तस्य मानसे-आत्यन्तिकं परिवर्तनं जातम्। तत्कारणेन लाहोर नेशनल महाविद्यालयस्याभ्यासं परित्यज्य भगतसिंहेन भारतस्य स्वातन्त्र्यार्थं 'नौजवान भारत सभा' इत्यस्य संस्थाया: स्थापना कृता। तत: काकोरीकाण्डघटनात: व्यथित: भूत्वा चन्द्रशेखर आजादस्य 'हिन्दुस्तान रिपब्लिकन एसोशियेशन' नामकसंङ्घटने स्वसंस्थाया: वा सङ्घटनस्य विलीनीकरणं कृतवान्। तदनु तस्य नूतनं नाम 'हिन्दुस्तान सोशलिष्ट रिपब्लिकन एसोशिएशन' इति कृतम्। अस्य सङ्घटनस्योद्देश्यं सेवा, त्याग: एवञ्च सहिष्णुनवयुवकानां सर्जनमासीत्।

तत: भगतसिंहेन राजगुरुणा सह मिलित्वा १७/१२/१९२८ तमे दिनाङ्के लाहोरमध्ये सहायकरक्षकाधीक्षकस्य ब्रिटिशाधिकारिण: जे.पी.सांडर्स इत्यस्य हत्या-कृता। अस्यां योजनायां चन्द्रशेखरआझादस्यापि महत्त्वपूर्णं योगदानमासीत्।

ततः भगतसिंहः स्वक्रान्तिकारीसहायकेन बटुकेश्वरदत्तेन सार्धं मिलित्वा अलीपुरमार्गे देहल्यां (दिल्ली) स्थित ब्रिटिश-भारतस्य तत्कालीनमध्यसभागारे (सेन्ट्रलएसेम्बलीमध्ये) ८/४/१९२९ तमे दिनाङ्के ब्रिटिशसर्वकारं जागरितुं विस्फोटकं क्षिप्तवान्। ततः तत्रैव भगतसिंहेन शरणागतिः स्वीकृता। तदनु न्यायालये लाहोरषड्यन्त्रमध्ये न्यायाधीशेन भगतसिंहः, राजगुरुः एवं सुखदेवः इत्येषां क्रान्तिकारिणां कृते मृत्युदण्डस्योद्घोषणा कृता। अतः २३/३/१९३१ तमे दिनाङ्के मध्यरात्रौ लाहोरकारागारे एतेभ्यो मृत्युदण्डः प्रदत्तः। अतः भगतसिंहः शहीदभगतसिंहः इति नाम्ना जनमानसे स्थानं प्राप्तवान्। अस्य क्रान्तिवीरस्येतिहासः-अद्यापि नवयुकेभ्यः प्रेरणाप्रदः वर्तते।

## अशफाकः उल्लाहखानः



अशफाकः उल्लाहखानः भारतीयस्वातन्त्र्यसेनायाः अभिन्नाङ्गत्वेन गण्यते। अस्य जन्म उत्तरप्रदेशस्य शहीदगढ, शाहजहाँपुरनगरे २२/१०/१९०० दिनाङ्के जातम्। तस्य पितुः नाम मोहम्मदशफीक उल्लाहखानः आसीत्। तस्य मातुः नाम मजहूरीन्निशां बेगम इत्यासीत्। जन्मतः तस्य धर्मः इस्लाम आसीत्।

अशफाकस्य परिवारे एकोऽपि जनः स्नातकः न आसीत्। तदा तस्य मातामहस्य परिवारे अधिकांशतः जनाः उच्चशिक्षिताश्चासन् तेभ्यो केचन मण्डलोपाध्यक्षाः, (डेप्युटी कलेक्टर) तथा च केचन एस.जे.एम. (सबज्युडिशीयल मेजिस्ट्रेट) पदमलङ्कुर्वाणाश्चासन्। १८५७ ईस्वीयाब्दे सञ्जातसंग्रामे यदा अशफाकस्य मातामहपक्षेण हिन्दुस्तानस्य सहायता न कृता, तदा जनताभिः तस्य भवनं (कोठी) भस्मसात्-कृतमासीत्। तद्भवनम् अद्यावधि, ''जलीकोठी'' इति नाम्ना प्रसिद्धं वर्तते। अशफाकेन स्वबलिदानेन सः कलङ्कः परिहृतः। सर्वे तं सस्नेहं 'अच्छु' इति नाम्ना आह्वयन्ति स्म। अपरं तस्य वारसी एवं हसरत इति उपनाम आस्ताम्।

अस्य ज्येष्ठभ्रातुः नाम रियासत उल्लाह खानः आसीत्। सः रामप्रसादः बिस्मिलस्य सहाध्यायी आसीत्। अतः सः अशफाकाय तस्य परिचयं प्रदत्तवान्। बिस्मिलः काकोरीकाण्डतः पलायितः अभवत् एतां वार्तां श्रुत्वा अशफाकः बिस्मिलं मिलितुम् अत्युत्साहितश्चासीत्।

एकदा खन्नोतनदीतटे-एकान्ते बिस्मिलस्य गुप्तसभासीत् तत्र अशफाकः जगाम। तस्मिन् समये उभयोर्मध्ये वार्तालापः जातः तदनुसारं सर्वेषां विरोधे सति अशफाकः पुनः बिस्मिलः मिलितुम् आर्यसमाजमन्दिरं जगाम। तत्र उभयोर्मध्ये गुप्तवार्तालापोऽभूत्। तदनुसारं सः अशफाकः तस्य मातृवेदी सङ्घटनस्य सभ्यपदं स्वीकृतवान्। अतः परं उर्दुकवितायाः लेखकः अशफाकः जीवनस्य नूतनां दिशां लब्धवान्। ततः अशफाकबिस्मिलौ क्रान्तिकारीसङ्घटनस्य कार्ये संलग्नौ अभवताम्। तत्र १/१/१९२५ दिनाङ्के दि रिवोल्यूशनरी नामक-आङ्लसमाचारपत्रेऽङ्कितं घोषणापत्रं-उत्तरप्रदेशस्य प्रत्येकस्थले वितरणस्य अशफाकस्य व्यवस्थया प्रभावितः सन् हिन्दुस्तान रिपब्लिकन् एसोशियेशन (एच.आर.ए.) इत्यस्य कार्यकारिणी सदस्यः योगेशचन्द्र चेटर्जी अशफाकं बिस्मिलस्यसहकारी (लेफ्टिनन्ट) सदस्यरूपेण उद्घोषितवान्। ततः — प्रदेशस्य संपूर्णं कार्यभारं उभयस्कन्धयोः संस्थाप्य स्वयं बंगालं प्रत्यगमत्।

यदा बंगालमध्ये सचीन्द्रनाथः सान्यालः एवञ्च योगेशचन्द्रः चेटर्जी-इत्यनयोः अधिग्रहणम् जातम्, तदा एच.-आर.-ए. इत्यस्य संपूर्णं कार्यभारं अशफाकबिस्मिलौ स्वीकृत्य अन्यैः सहायकैस्सह संगठनस्य कृते धनावश्यकता पूर्त्यर्थं एका योजना घटिता तदा अशफाकः स्वज्येष्ठभ्रातुः भुशुण्डिकाम् एवं मञ्जूषाद्वयं गोलिकाः बिस्मिलाय प्रदत्तवान्। येन धनाढ्यजनानां गृहलुण्ठनकर्मतः सङ्घटनस्य कृते धनसंचयः भवेत्।

यदा बिस्मिलेन ब्रिटिशसर्वकारस्य अर्थागारलुण्ठनस्य वार्ता कृता, तदा अशफाकेन तस्य-उग्रविरोधः कृतः आसीत्। तं विरोधं न सहमानः अपि अशफाकः उक्तवान् एवं कारणेन ब्रिटिशसर्वकारः सर्वम् निर्मूलनम् करिष्यति अतः तन्न कर्तव्यम्। एवं विरोधे सति अन्ते बिस्मिलस्याज्ञां स्वयम् अशफाकः काकोरीकाण्डस्य सफलतायै सर्वं कर्तुं प्रतिज्ञाबद्धः अभवत्।

अयं मुस्लिमः आसीत्, तथापि भारतस्य कृते कर्तव्यपरायणः आसीत्। ततः ९/८/१९२५ तमे दिनाङ्के सायङ्काले काकोरी रेलयानस्थानकात् रेलयानं गतिमन्तं भवति, तदैव राजेन्द्रनाथकाहिडी रिलयानस्य लोहशृङ्खलां कर्षितवान्। अशफाकः रेलयानचालकं स्वायत्तं कृतवान्। बिस्मिलः आरक्षकं (गार्ड) भूमिगतं कृत्वा धनपूर्णलोहमञ्जूषां रेलयानतः बहिः क्षिप्तवान्। ततः अशफाकः स्वकार्यं मन्मथनाथाय दत्त्वा संपूर्णशक्त्या शीघ्रतया धनसञ्चितलोहमञ्जूषां त्रोटितवान्। इदं अशफाकस्य शौर्यपूर्णकार्यम्-अवलोक्य सर्वे तं प्रति नतमस्तकाः अभूवन्। यदि धनमञ्जूषां शीघ्रं न अत्रुटिष्यत् तदा लखनऊतः समागतरक्षकैः सैनिकैस्सह सर्वेषां भयङ्करं घर्षणम् अभविष्यत्, तदा तत्र बहूनां जनानां बलिदानं निश्चितम् अभविष्यत्। अतः अस्य काण्डस्य सम्पूर्णयशसः अधिकारी भारतमातुः सुपुत्रः अशफाक उल्लाह खानः वर्तते। ततः ९/१२/१९२७ तमे दिनाङ्के इमां घटनां लक्ष्यीकृत्य अशफाकाय फैजाबादकारागारे मृत्युदण्डः प्रदत्तश्चासीत्।

अद्यापि क्रान्तिकारी अशफाकः उल्लाह खानः हिन्दुमुस्लिम-एकतायाः प्रतीकरूपेण जनमानसे इतिहासे च अङ्कितः वर्तते।

### रामप्रसाद बिस्मिलः



रामप्रसाद बिस्मिलः भारतस्य स्वातन्त्र्यसङ्ग्रामस्य क्रान्तिकारी नेता आसीत्। तेन भारतदेशस्य स्वातन्त्र्यार्थं स्वबलिदानं प्रदत्तं। सः त्रिंशद्वर्षात्मकमायुरुपभुज्य ब्रिटिशसर्वकारे देशहितार्थं मृत्युदण्डं प्राप्तवान्। अनेन मैनपुरीषड्यन्त्रम् एवञ्च काकोरीकाण्डम् इव अनेकासु घटनासु स्वीय-साहसपूर्णं देशहितार्थं योगदानं प्रदत्तमासीत्। तथायं हिन्दुस्तान रिपब्लिकन एसोसियेशन नामकसङ्घटने सदस्यरूपेण सविशेषं कार्यं कृतवान्।

रामप्रसादबिस्मिलस्य जन्म ११/६/१८७९ तमे दिनाङ्के उत्तरप्रदेशस्य शाहजहाँपुरे जातम्। तस्य पितुः नाम मुरलीधरः तथा च मातुः नाम मूलमती आसीत्। तस्य पितरौ भगवतः रामचन्द्रस्य आराधकौ आस्ताम्। अतः अस्य नाम रामप्रसादः इत्यङ्कितम्।

स्वामी दयानन्दसरस्वती इत्यस्य पुस्तकं सत्यार्थप्रकाशस्याध्ययनत्वात् तस्य जीवने आत्यन्तिकपरिवर्तनं जातमासीत्। तत्र स्वामी सोमदेवसम्पर्केण तस्य मनसि देशभक्तिः प्रादुर्भूता अभवत्।

ततः १९१५ इस्वीयाब्दे स्वभ्रातुः परमानन्दस्य मृत्युदण्डसमाचारं श्रुत्वा पं.रामप्रसाद बिस्मिलः ब्रिटिशसाम्राज्यं समूलं नष्टं कर्तुं प्रतिज्ञां कृतवान्। ततः १९१६ ईस्वीयाब्दे पं. रामप्रसादस्य एकं पुस्तकं प्रकाशितम् अभवत्। तेन पुस्तकमाध्यमेन बहवः नवयुवकाः देशस्वातन्त्र्यार्थं पण्डितेन सह मिलिताः अभवन्। अतः पं. गेंदालालदीक्षितस्य मार्गदर्शने 'मातृवेदी' नामकसङ्घटनस्य स्थापना कृता। अस्यां संस्थायां ब्रिटिशसर्वकारविरूद्धं कार्यायोजनं भवति स्म। तस्य मुख्यकेन्द्रस्थानं मैनपुरी आसीत्। अतः अस्य षड्यन्त्रस्य नाम ''मैनपुरीषड्यन्त्रम्'' इति नाम्ना प्रसिद्धमस्ति। अस्य सङ्घटनस्य कृते धनसञ्चयार्थं पण्डितेन १९१८ ईस्वीयाब्दे त्रिवारं लुण्ठनकर्म कृतम्। अस्य मैनपुरीषड्यन्त्रस्यैव एकः सदस्यः देशद्रोही दलपतसिंहेन अस्य गुप्तवार्ता ब्रिटिशाधिकारिणां समक्षं कृता अभवत्। ब्रिटिशाधिकारिभिः मातृवेदी संस्थायाः प्रमुखाधिकारिणः अधिगृह्य कारागारे क्षिप्ताः। ततः रामप्रसादः पलायितः। अतः दलमिदं छिन्नभिन्नमिव जातम्। पलायनावस्थायां वर्षद्वयं यावत् पं. रामप्रसादेन नैकानि कार्याणि कृतानि। मुख्यतया साहित्यसर्जनस्य कार्ये ''सरफरोशी की तमन्ना'' सुप्रसिद्धं लोकप्रियं पुस्तकमिदं रचितम्। तथान्यानि पुस्तकानि अपि रचितानि आसन्। ततः पुनः क्रान्तिकारीप्रवृत्तौ संलग्नः अभवत्, तस्मिन् समये हिन्दुस्तान रिवोल्युशन एसोसियेशन (एच.आर.ए.) इत्यस्य सङ्घटनस्य रचना कृता। तस्मिन् मुख्यनेतृत्वेषु रामप्रसादः आसीत्। ततः १९२५ इस्वीयाब्दे काकोरीकाण्डं जातम्। तस्मिन् पं. रामप्रसादः बिस्मिलः एवं मुकुन्दीलालः स्वयोगदानं प्रदत्तवन्तौ। ततः न्यायालये काकोरीकाण्डं लक्ष्यीकृत्य आजीवन- कारागारदण्डः अभवत्। एवं पं. रामप्रसादाय गेंदालालदीक्षितः आगरा (वीला) तः

मोचयितुं आयोजनं कृतमासीत् इति घटनां लक्ष्यीकृत्य ९/१२/१९२७ तमे दिनाङ्के प्रातः गोरखपुरकारावासमध्ये पं. रामप्रसाद बिस्मिलाय मृत्युदण्डः प्रदत्तः।

एवं भारतदेशं ब्रिटिशसर्वकारात् मोचयितुम् अनेकेषु क्रान्तिवीरेषु रामप्रसादस्यापि महत्त्वपूर्णं स्थानं वर्तते।

येनात्यन्तनिर्धनपरिवारे जन्म एवं साधारणशिक्षायां प्राप्तायां सत्याम् असाधारणप्रतिभया हिन्दुस्तानप्रजातन्त्रसङ्घमाध्यमेन अविस्मरणीयं कार्यं कृतमासीत्।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) चन्द्रशेखर अझादस्य जन्म ......... ईस्वीयाब्दे अभवत्। (१९०६, १९०८, १९०९)

(२) क्रान्तिवीर भगतसिंहस्य जन्म ......... ईस्वीयाब्दे अभवत्। (१९०८, १९०७, १९१०)

(३) अशफाकउल्लाहखानस्य जन्म ......... राज्ये भवत्। (गुजरात, पंञ्जाब, उत्तरप्रदेश)

(४) रामप्रसादबिस्मिलस्य पितुः नाम......... आसीत्। (मुरलीधरः, श्यामाप्रसादः, धर्मदत्तः)

(५) शहीद भगतसिंहस्य उपनाम ......... आसीत्। (बिस्मिलः, भागोवाला, भगो)

(६) चन्द्रशेखर आझादः स्वपितुः नाम ......... इत्युक्तवान्। (स्वाधीनता, पराधीनता, धार्मिकता)

(७) जलियावालाबाग हत्याकाण्डं ......... ईस्वीयाब्दे जातम्। (१९२१, १९१९, १९२२)

(८) रामप्रसाद बिस्मिलः ......... कारागारे मृत्युदण्डं प्राप्तवान्। (लाहोर, गोरखपुर, कलकत्ता)

(९) मैनपुरीकाण्डान्तर्गतदलपतसिंहः ......... आसीत्। (देशद्रोही, देशभक्तः, सामान्यजनः)

(१०) शहीद भगतसिंहस्य पितुः नाम ......... आसीत्। (सरदारः किशनसिंहः, सरदारनारायणदेवः, सरदाररमणलालः)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) चन्द्रशेखर आझादस्य सम्पूर्ण नाम किमासीत् ?

(२) आझादस्य प्रारंभिकजीवनं कुत्र व्यतीतम् ?

(३) शिखपरिवारे कस्य क्रान्तिवीरस्य जन्म अभवत् ?

(४) भगतसिंहः कति वर्षात्मकः भूत्वा क्रान्तिकारिसंस्थाभिस्सह कार्यं कुर्वाणः आसीत् ?

(५) काकोरीकाण्डमध्ये के मृत्युदण्डं प्राप्तवन्तः ?

(६) अशफाकस्य उपनाम किमासीत् ?

(७) अशफाकः बिस्मलं मिलितुं कुत्र गतवान् ?

(८) एच.आर.ए. इत्यस्य संपूर्णं नाम किम् आसीत् ?

(९) रामप्रसादस्य उर्दुभाषायां किं नाम आसीत् ?

(१०) कस्मिन् कारागारे भगतसिंहाय मृत्युदण्डः प्रदत्तः आसीत् ?

### ३. टिप्पणीं लिखन्तु।

(१) काकोरीकाण्डस्य स्वरूपम्।

(२) मैनपुरीकाण्डस्य स्वरूपम्।

(३) भगतसिंहस्य परिचय:।

(४) अशफाकउल्लाहखानस्य परिचय:।

(५) स्वातन्त्र्यसंग्रामस्य स्वरूपम्।

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) चन्द्रशेखर आझादस्य देशभक्तिं वर्णयत।

(२) एच.आर.ए. इत्यस्य मुख्यम् उद्देश्यं कार्यञ्च वर्णयत।

(३) क्रान्तिवीराणां बलिदानेन भारतदेशे क: प्रभाव: अदृश्यत।

(४) अशफाकस्य हिन्दुमुस्लिम-एकताया: प्रतीकरूपेण वर्णनं कुरुत।

(५) रामप्रसादबिस्मिलस्य मृत्युदण्डकारणं वर्णयत।

### ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) शहीदभगतसिंह: | (१) १९२८ |
| (२) चन्द्रशेखर-आजाद: | (२) १९२७ |
| (३) अशफाक-उल्लाहखान: | (३) १९२५ |
| (४) रामप्रसाद-बिस्मिल: | (४) १९४७ |
| (५) स्वतन्त्रता | (५) १९१० |

#### छात्रप्रवृत्ति:

- अन्यक्रान्तिवीराणां जीवनचरित्राणि पठित्वा नाट्याभिनयं कुर्वन्तु।

#### सुभाषितम्

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्तति:॥**

●

# ६ गुजरातस्य राजानः

## प्रस्तावना

समाजव्यवस्थायाः महत्त्वपूर्णम् अङ्गं राजतन्त्रम्। राजतन्त्रं मानवजीवनाय अनिवार्यसंस्था अस्ति। कृतयुगादारभ्य मानवजीवने राजतन्त्रस्य प्रभावः स्वयं स्पष्टः अस्ति। भूतले यदि राजानः नाभविष्यन् तर्हि शक्तिशालिनः मनुष्याः दुर्बलजनानामुपरि दुर्व्यवहारं अकरिष्यन्, अमारयिष्यन् वा। यथा बलिनः मत्स्याः दुर्बलमत्स्यान् खादन्तीति महाभारते शान्तिपर्वण्यपि उल्लिखितमस्ति। राजतन्त्रस्य मुख्यस्तम्भः नृपः भवति। 'यथा राजा तथा प्रजा' इति उक्तिः सुविख्याता। राज्ञः सामर्थ्यं राज्यस्य विकासाय आवश्यकं वर्तते।

पूर्वं भारतदेशः नैकेषु राज्येषु विभक्तः आसीत्। पश्चिमक्षेत्रस्य गुजरातस्य राजतन्त्रं काले काले प्रभावमपि अजनयत्। एतस्मिन् पाठे वयं केषाञ्चन सुविख्यातानाम् इतिहासे स्थानप्राप्तानां राज्ञां परिचयं प्राप्स्यामः।

## श्रीकृष्णकुमारसिंहः गोहिलः ( भावनगरम् )



भावनगरस्य राज्ञः श्रीकृष्णकुमारसिंहस्य जन्म १९१२ तमे वर्षे मई मासस्य नवदशतमे दिनाङ्के अभवत्। यदा सः नववर्षीयः आसीत्, तदैव तस्य पितुः निधनं जातम्। अतः सः राजा अभवत्। तस्य युवावस्थापर्यन्तं राजव्यवस्थायाः दायित्वं मुख्यसमित्या भवति स्म। प्राथमिकशिक्षणं भावनगरे राजकोटे च प्राप्य सः इंग्लैण्ड देशे उच्चाभ्यासं कृतवान्। १९३१ तमे वर्षे मुख्यसमित्या तस्मै राज्यस्य पूर्णसत्ता प्रदत्ता। तस्मिन्नेव वर्षे गोंडलराजस्य राजपुत्र्या विजयाबा इत्यनया सह तस्य विवाहः सम्पन्नः जातः। तस्य कार्यकाले सः नैकानि प्रजाहितकार्याणि अकरोत्। पञ्चायतशासनव्यवस्थायां सः निर्वाचनस्यारम्भं-कारितवान्। कृषिकार्यस्य विकासार्थम् आदर्शकृषिक्षेत्रस्य निर्माणमकरोत् सः। गौरीशङ्करतडागस्य विस्तृतीकरणं कृत्वा पेयजलस्य व्यवस्थाम् अकारयत्। आरोग्यक्षेत्रेऽपि सः कल्याणकारिकार्याणि अकरोत्। सौराष्ट्रप्रान्तस्य प्रथमायाः भूगर्भजलनिर्गमयोजनायाः आरम्भकर्ता सः एव। उद्योगप्रवासनक्षेत्रेऽपि सः महत्त्वपूर्णं योगदानम् अदात्। समुद्रमार्गे महुवा-भावनगरयोः मध्ये यातायातव्यवस्थामारब्धवान्। स्वतन्त्रतानन्तरं सौराष्ट्रदेशे स्वराज्यं समर्पितवत्सु सः प्रथमः आसीत्। प्रजावत्सलः प्रजाकल्याणकर्मसु रतः सः अद्यापि पूजनीयः अस्ति।



## श्रीसयाजीरावः गायकवाडः ( वटपत्तनम् )

राज्ञः सयाजीरावगायकवाड-तृतीयस्य मूलनाम श्रीगोपालरावः गायकवाडः आसीत्। तस्य जन्म महाराष्ट्रस्य नासिकजनपदे १८६३ तमे वर्षे मार्चमासस्य एकादशदिनाङ्के अभवत्। स्वशासनकाले सः विकासदृष्ट्या सम्पूर्णस्य वटपत्तनस्य आमूलपरिवर्तनम् अकरोत्। सः भारतीय-पुस्तकालयान्दोलनस्य जनकत्वेनापि प्रख्यातः अस्ति। स्वराज्ये वटपत्तने सः कलासाहित्यक्षेत्रे अमूल्यं योगदानम् अयच्छत्, येन वटपत्तनं कलानगररूपेण अपि प्रख्यातं जातम्। न केवलं साहित्यम् अपि तु उद्योग-प्रवासन-यातायातक्षेत्रेषु अपि सः नैकानि प्रजाकल्याणकार्यण्यकरोत्। प्रजाजीवनस्तरवर्धनाय सः स्वेच्छया एव नैकानि कार्याणि अकरोत्। सः शिक्षाप्रेमी, समन्वयवादी, सामाजिकसमरसतायै कृतनिश्चयः चासीत्। सः स्वजीवने स्वतन्त्रतान्दोलनम् अग्रताक्रमे स्थापितवान्। एवं सः एकः दूरदर्शी विद्वान् शासकः च आसीत्। १९३९ तमे वर्षे फरवरीमासस्य षष्ठे दिनाङ्के सः दिवङ्गतः।

### सिद्धराज-जयसिंहः



गुजरातस्य चालुक्यवंशस्य राज्ञः कर्णस्य मीनळदेव्याः च पुत्रः जयसिंहः, सोलंकी वंशस्य सर्वश्रेष्ठः सम्राट् आसीत्। तस्य जन्म १०९४ तमे वर्षे अभवत्। सः सिद्धराजः इति उपाधिना प्रख्यातः आसीत्। अतः सः सिद्धराज-जयसिंहः इति नाम्ना अपि प्रचलितः जातः। पितुः निधनकाले सः अल्पवयस्कः आसीत् अतः तस्य माता राज्यस्य अभिभाविकारूपेण कार्यं कृतवती। नृपत्वेन आरम्भकाले एव सः समीपवर्तिराज्यानि जेतुमारभत। सर्वत्र विजयं प्राप्य तत्रत्यान् राज्ञः सामन्तरूपेण राज्यपालरूपेण वा नियोजितवान्। नैकानि युद्धानि कृत्वा सः अवन्तिनाथस्य उपाधिमपि प्राप्तवान्। स्वराज्यस्य एतादृशः विस्तारः तस्यैव वंशस्य केनापि अन्येन राज्ञा कृतं नासीत्। तस्य राज्यस्य विस्तारः उत्तरे जयपुर-जोधपुर-पर्यन्तं पश्चिमे भीलसा पर्यन्तमासीत्। सौराष्ट्रं कच्छप्रदेशः चापि तस्य राज्यस्य अङ्गभूतौ आस्ताम्। प्रायशः विजयी राजा पराजितस्य राज्ञः धनवैभवं हरति, परन्तु मालवदेशस्य उपरि विजयानन्तरं सः मालवदेशस्य पुस्तकभण्डारात् मुल्यवतः ग्रन्थान् स्वराज्ये आनीतवान्। न केवलं राज्यविस्तारः, परन्तु सांस्कृतिकविकासाय अपि सः स्मरणीयः अस्ति। जयसिंहः कवीन् विदुषः च राज्याश्रयं प्रश्रयञ्च दत्वा शिक्षा-साहित्यकेन्द्ररूपेण स्वराज्यस्य कीर्तिम् अवर्धयत। तेषु विद्वत्सु अन्यतमः कलिकालसर्वज्ञः जैनमुनिः हेमचन्द्रः। अनेन मुनिना 'सिद्धहेमव्याकरणम्' इति ग्रन्थद्वारा सिद्धराजस्य नाम चिरस्मरणीयः कृतः। अभूतपूर्वसम्मानकार्यक्रमे जयसिंहस्य आदेशेन अस्य महाग्रन्थस्य गजोपरि समग्रे पाटणनगरे शोभायात्रा आयोजिता। राजा स्वयं गजस्य अग्रे चलन् आसीत्। तस्य स्थापत्येषु रुद्रमहालयमन्दिरम्, सहस्रलिङ्गसरोवरः, कीर्तिस्तम्भः, राज्ञ्याः वापी (राणी की वाव) दशावतारनारायणमन्दिरञ्च अन्यतमाः सन्ति। जयसिंहः सन्ततिविहीनः आसीत्। तेनैव कारणेन जीवनस्य अन्तिमकालः दुःखपूर्णः आसीत्। तस्य मृत्योः पश्चात् तस्य पितृव्यस्य क्षेमराजस्य प्रपौत्रः कुमारपालः राजा अभवत्।

### मूलराज-सोलंकी



मूलराजसोलंकी गुजरातस्य चावडावंशस्य अन्तिमराजानं पराभूय ई.स. ९४० तमे वर्षे अणहिलवाड-पाटणे स्वस्य स्वतन्त्रं राज्यं स्थापितवान्। सः सौराष्ट्रस्य कच्छस्य च राजानौ अपि पराजितवान्। सः शैवधर्मी आसीत्। वैदिकपरम्परानुसारं सः राजधर्मपालनं करोति स्म। तेन दिगम्बरमार्गिणां कृते मूलवस्तिका, श्वेताम्बरमार्गिणां कृते मूलनाथस्य जिनदेवस्य मन्दिराणि अस्थापयत्। तस्य एव शासनकाले शिल्पस्थापत्यस्य सम्यक् विकासः जातः। मूलराजकालस्य जैनलेखकाः तं वेदपरम्परानुयायिरूपेण मूलराजं वर्णयन्ति। मूलराजस्य कार्यकाले समुद्रमार्गेण वाणिज्यस्य विकासः जातः आसीत्। एतस्य राजधानी अणहिलवाड (अद्यतनं पाटणनगरम्) आसीत्। तत्र १००० तमे वर्षे एकलक्षं जनसङ्ख्या आसीत्। भारतवर्षस्य प्रमुखनगरेषु तस्य राज्यस्य गणना भवति स्म। स्वतन्त्रराज्यस्य स्थापनानन्तरं राज्यविस्तारं कर्तुं तेन नैके प्रयत्नाः कृताः। विग्रहराज-द्वितीयेन सह युद्धकाले रणस्थले मूलराजः वीरगतिं प्राप्तवान्। तस्य मृत्योः पश्चात् तस्य पुत्रः चामुण्डरायः शासनमकरोत्। तदनु १००८ तः १०२२ पर्यन्तं तस्य पुत्रः दुर्लभराजः राज्यं रक्षितवान्।

### धर्मवीरः रावलजयसिंहचौहाणः

चाम्पानेरस्य चौहाणवंशस्य क्षत्रियाः राजानः क्रूरैः मुस्लिमशासकैः सह शताब्दीपर्यन्तं युद्धं कृतवन्तः, परन्तु धर्मपरिवर्तनं कृत्वा तेषाम् आधिपत्यं न स्वीकृतवन्तः। स्वाभिमानिनः देशभक्ताः धर्मरक्षकाः च ते स्वतन्त्रशासनं

कृतवन्तः। मुस्लिमशासकाः सततं चाम्पानेरं जेतुं प्रयत्नरताः आसन्, परन्तु वीराणां चौहाणराज्ञाम् असिसामर्थ्यस्य पुरतः बलशालिनः मुस्लिमशासकाः पराजयम् एव प्राप्तवन्तः। मोहम्मदशाहस्य मृत्योः पश्चात् १४५८ तमे वर्षे अबु-अल-फाथ सिंहासनारूढः जातः, यः अनन्तरं महमूदबेगडा नाम्ना प्रसिद्धः जात। १४८२ तमे वर्षे सः चाम्पानेरस्य उपरि लक्षत्रयस्य सेनायाः साहाय्येन आक्रमणमकरोत्। तदानीं तत्र कनकदासचौहाणस्य पुत्रस्य रावल-पत्ताई-जयसिंहस्य शासनम् आसीत्। जयसिंहः इतिहासे पावपतिः, पत्ताईरावलः इति नाम्ना अपि प्रसिद्धः अस्ति। स्ववंशस्य पराक्रमस्य परिचयं यच्छन् जयसिंहचौहाणः अस्मिन् युद्धे वीरतापूर्वकं प्रत्याक्रमणं कृतवान्। महमूदेन चाम्पानेरस्य पावागढ इति दुर्गं परितः



स्थापितवान्। तस्मिन् समये सः नैकानि मन्दिराणि नाशितवान्। पावागढस्य महाकालीमन्दिरम् अपि त्रोटितवान्। यदा वर्षद्वयं यावदपि सः जेतुं न शक्तवान् तदा उत्कोचव्याजेन काञ्चन सैनिकान् साधयित्वा कैश्चित् दुर्गद्वारैः प्रविश्य आक्रमणम् अकरोत्। मातृभूमिभक्ताः प्रायशः सप्तशतं राजपूतसैनिकाः सहस्रशः मुस्लिमसैनिकान् मारितवन्तः। पराजयस्य सम्भावनायां महाराज्ञ्या सह नैकाः क्षत्रियमहिलाः स्वात्मानं अग्नये समर्पितवत्यः। आहतः जयसिंहः, तस्य मन्त्री सुरी च मुस्लिमसैनिकैः गृहीतौ जातौ। महमूदेन सह सम्भाषणे तेनोक्तं यत् "अस्याः भूमेः उपरि मम वंशानुगताधिकारः अस्ति। राज्यमिदं पूर्वजैः अर्जितमस्ति। मातृभूमेः रक्षार्थं धर्मपरिवर्तनस्य अपेक्षया वीरगतिः वरम्।" कारागृहे पञ्चमासान् यावत् तस्योपरि यातनायाः पराकाष्ठाः कृता। परन्तु धर्मपरिवर्तनार्थं नाङ्गीकृतवान्। रावलजयसिंहचौहाणस्य, तस्य मन्त्रिणः च वीरगति देशधर्मरक्षार्थं कुलसम्मानार्थं उत्कृष्टमुदाहरणमस्ति। अद्यापि पावागढप्रदेशे भग्नावशेषाः वीरतायाः कथां कथयन्ति।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) राजतन्त्रस्य मुख्यस्तम्भः ......... अस्ति। (राजा, वणिक्, मन्त्री)

(२) ......... मानवजीवनाय अनिवार्यसंस्था अस्ति। (राजतन्त्रं, राजनीतिः, कुटुम्बप्रथा)

(३) ......... राज्ये हेमचन्द्राचार्यः उत्तमः विद्वान् आसीत्। (कृष्णकुमारसिंहस्य, जयसिंहस्य, सयाजीरावस्य)

(४) ......... भावनगरस्य राजा आसीत्। (कृष्णकुमारसिंहः, जयसिंहः, सयाजीरावः)

(५) ......... वर्षे कृष्णकुमारस्य पितुः मृत्युः अभवत्। (पञ्चमे, नवमे, दशमे)

(६) सयाजीरावस्य मूलनाम ......... आसीत्। (गोपालरावः, महेशरावः, लक्ष्मीनारायणः)

(७) मूलराजः ......... आसीत्। (वैष्णवः, शैवः, बौद्धधर्मी)

(८) मूलराजस्य कार्यकाले ......... वाणिज्यस्य विकासः जातः। (वायुमार्गेण, समुद्रमार्गेण, भूमार्गेण)

(९) कलिकालसर्वज्ञः इति नाम्ना ......... विख्यातः। (सिद्धराजः, जयसिंहः, हेमचन्द्राचार्यः)

(१०) जयसिंहचौहाणस्य मन्त्रिणः नाम ......... आसीत्। (सुरी, महमूदः, तानसेनः)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) समाजव्यवस्थायाः महत्त्वपूर्णमङ्गं किम् ?

(२) श्रीकृष्णकुमारसिंहस्य जन्म कदा अभवत् ?

(३) मूलराजः कुत्र स्वतन्त्रं राज्यं स्थापितवान् ?

(४) जयसिंहः कस्य पुत्रः आसीत् ?

(५) सयाजीरावगायकवाडस्य मूलनाम किम् ?

(६) कृष्णकुमारः कस्य तडागस्य विस्तृतीकरणं कृतवान् ?

(७) सौराष्ट्रप्रान्ते भूगर्भजलनिर्गमयोजनायाः आरम्भकर्ता कः ?

(८) सिद्धराजेन कस्य शोभायात्रा आयोजिता ?

(९) सिद्धराजः कस्य राज्ञः ग्रन्थान् आनीतवान् ?

(१०) मूलराजः श्वेताम्बरमार्गिणां कृते किं कृतवान् ?

## ३. टिप्पणीं लिखन्तु।

(१) सिद्धराजस्य साहित्यप्रेम।

(२) सयाजीरावस्य प्रजाहितस्य कार्याणि।

(३) मूलराजस्य जीवनम्।

(४) जयसिंहचौहाणस्य वीरता।

## ४. सविस्तरम् उत्तरं लिखन्तु।

(१) श्रीकृष्णकुमारस्य बाल्यकालस्य शिक्षणस्य विषये सविस्तरं लिखत।

(२) सिद्धराजः स्वराज्यस्य विस्तारं कथं कृतवान् ?

(३) महमूदबेगडा कथं चाम्पानेरदुर्गं जितवान् ?

## ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) मूलराजः सोलंकी | (१) चाम्पानेरः |
| (२) जयसिंहःचौहाणः | (२) हेमचन्द्राचार्यः |
| (३) सयाजीरावगायकवाडः | (३) भावनगरम् |
| (४) कृष्णकुमारसिंहःगोहिलः | (४) वटत्तनम् |
| (५) कलिकालसर्वज्ञः | (५) शैवधर्मी |

### छात्रप्रवृत्तिः

- पाठे वर्णितानां राज्ञां शासनकाले विद्यमानानां स्थापत्यानां विवरणं टिप्पणीपुस्तके सचित्रं लिखत।
- केषां शासनकाले प्रजाकल्याणकार्याणि जातानि इत्यस्मिन् विषये शिक्षकस्य मार्गदर्शनानुसारेण चर्चां कुरुत।

### सुभाषितम्

**कालहन्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥**

# ७ धारासभा

## प्रस्तावना

प्रजातन्त्रम् अर्थात् प्रजाया:, प्रजया, प्रजायै च शासनम्। प्रजातन्त्रशासने वस्तुत: प्रजा एव राजा भवति, अत: प्रजातन्त्रम् इत्युच्यते। अस्य प्रजातन्त्रस्य लोकतन्त्रम्, स्वराज्यम्, जनतन्त्रम्, सङ्घ: इत्यादीनि नामान्तराणि सन्ति। प्रजया निर्वाचिता: प्रतिनिधिय: प्रजातन्त्रशासने प्रजाप्रतिनिधिरूपेण कार्यं कुर्वन्ति। तत्र प्रजा स्वमताधिकारेण राज्यसभाप्रभृतिसंसदां निर्माणं करोति। प्रजा एव प्रत्यक्षाप्रत्यक्षरीत्या निर्वाचनपद्धत्या, प्रतिनिधिसरण्या च शासनचक्रं संसृजति। प्रजा सर्वाङ्गसुन्दरशासनस्य, शासनविधानस्य च निर्माणं करोति। संविधानरीत्या केन्द्रसर्वकार:, राज्यसर्वकारश्च मिलित्वा देशस्य शासनं कुर्वन्ति। एतदर्थं केन्द्रे लोकसभा, राज्यसभा च स्त:, राज्येषु विधानसभा (धारासभा) विधानपरिषत् च वर्तेते। विधानपरिषत् राज्यस्य उपरितनं गृहम् अस्ति, अपि च विधानसभा राज्यस्य अधस्तनगृहमस्ति। भारते आन्ध्रप्रदेश:, महाराष्ट्रम्, तेलङ्गाना, बिहारम्, कर्णाटकम्, उत्तरप्रदेश: चेति षट्सु राज्येषु विधानपरिषद् अस्ति। राज्यस्य सञ्चालनं कर्तुं निर्वाचनप्रक्रियाद्वारा निर्वाचितानां सभ्यानां सभा अर्थात् विधानसभा अथवा धारासभा। विधानसभाया: सभ्य: विधानसभ्य: अथवा धारासभ्य: उच्यते।

## निर्वाचनपद्धति: -

धारासभाया: (विधानसभाया:) सदस्या: राज्यस्य जनै: चिता: प्रत्यक्ष-प्रतिनिधय: भवन्ति। प्रत्येकं पञ्चवर्षाणाम् अनन्तरं राज्ये निर्वाचनं भवति। केन्द्रसर्वकारस्य निर्वाचनायोगद्वारा सञ्चालिते निर्वाचने जना: स्वस्य प्रदेशस्य प्रतिनिधे: मतदानद्वारा वरणं कुर्वन्ति। मतदानार्थं न्यूनतमवय: अष्टादशवर्षाणि। धारासभाया: सदस्य: भवितुं भारतस्य नागरिकत्वं आवश्यकम् अस्ति। येषां पञ्चविंशति: वर्षाणि समाप्तानि ते भारतीया: निर्वाचनाय आवेदनं दातुं शक्नुवन्ति। आवेदनकर्ता मनसा स्वस्थ: स्यात्। तस्योपरि आपराधिक-अभियोग: न भवेत् इत्यस्य प्रमाणपत्रं दातव्यं भवति। भारते विधानसभाया: आहत्य ४१२० स्थानानि सन्ति तेषु महत्तमस्थानानि उत्तरप्रदेशे सन्ति। उत्तरप्रदेशस्य ४०३ धारासभास्थानानि सन्ति। गुजराते १८२ धारासभास्थानानि सन्ति।

## संविधानम् ( बन्धारणम् )

सङ्घस्य बन्धारणानुसारं धारासभाया: कार्यकाल: पञ्चवर्षाणां भवति। तदनु पुन: निर्वाचनायोगद्वारा निर्वाचनप्रक्रिया भवति। चिता: जनप्रतिनिधय: राज्यसर्वकारं रचयन्ति। आपदि कार्यकालवृद्धि: भवितुं शक्नोति, तथैव तस्य भङ्ग: अपि भवितुं शक्नोति। धारासभायां संविधानानुसारं सङ्ख्यामर्यादा अपि अस्ति। एकस्यां धारासभायां महत्तमसङ्ख्या ५०० न्यूनतमसङ्ख्या ६० भवितुमर्हति। परन्तु संसद: एकेन अधिनियमेन षष्ठित: न्यूना: अपि सदस्या: भवितुमर्हन्ति यथा गोवा, सिक्किम्, मिझोरम्, पुदुच्चेरी च। निर्वाचनद्वारा निर्वाचिता: सदस्या: विधायका: (एम.एल.ए.) कथ्यन्ते। सभाया: सरलसञ्चालनाय सदस्या: एव सभाध्यक्षस्य उपाध्यक्षस्य च निर्णयं कुर्वन्ति। अध्यक्ष: सर्वकार्याणां कृते उत्तरदायी भवति। स: निर्णायकत्वेन कार्यं करोति। स: सभायां चर्चाया: नेतृत्वं करोति। प्रायश: अध्यक्ष: राज्यस्य बलशालिन: पक्षस्य एव भवति। आपदि असामान्यपरिस्थितौ वा राष्ट्रपति: धारासभाया: विसर्जनं कृत्वा राष्ट्रपतिशासनं स्थापयितुं शक्नोति। तस्मिन् समये नूतनधारासभानिर्माणपर्यन्तं राज्यपाल: राज्यस्य सञ्चालनं करोति। विधानसभाया: निर्वाचितसदस्या: राष्ट्रपते: निर्वाचने भागं स्वीकर्तुं समर्था: सन्ति, विधानसभाया: सदस्या: राज्यसभायां प्रतिनिधीन् प्रेषयन्ति।



गुजरातविधानसभा भारतदेशस्य गुजरातराज्यस्य एकसदनयुक्ता धारासभा अस्ति। धारासभायाः १८२ सभ्याः गुजरातराज्यस्य १८२ स्थानेभ्यः निर्वाचनद्वारा निर्वाचिताः सन्ति।

## कार्याणि

सभाध्यक्षः सर्वकार्याणां कृते उत्तरदायी भवति। सः निर्णायकत्वेन कार्यं करोति। सः सभायां चर्चायाः नेतृत्वं करोति। प्रायशः अध्यक्षः राज्यस्य बलशालिनः पक्षस्य एव भवति। धारासभायाम् अर्थसङ्कल्प-स्वास्थ्य-रक्षा-शिक्षणादीनां योजनानाम् उपरि चर्चा भवति। तदनुगुणं राज्ये क्रियान्वयनं भवति। विधिनिर्माणस्य सम्पूर्णसत्ता धारासभायाः अस्ति। अस्मिन् जनसुरक्षा, शिक्षणं, स्थानिकस्वराज्यसंस्था, कृषिः, जल-आपूर्तिः, आरोग्यम्, भूमिः, वाणिज्यम् इत्येतेषां समावेशः भवति। केन्द्रसर्वकारः न्यायव्यवस्थायाः अभावे राज्यसर्वकारस्य इच्छया अनिच्छया वा आरक्षित-दलानि तत्र प्रेषयितुं शक्नोति। राज्यसभायाः सांसदाः राज्यस्य विधानसभायाः सभ्यद्वारा अनुपातमतदानद्वारा चिताः भवन्ति।

**विधानसभायाः अन्यानि कार्याणि पश्यामः।**

- राज्यसूच्यां समवर्तिसूच्यां च समाविष्टेषु विषयेषु विधिनिर्माणस्य अधिकारः विधानसभायाः हस्ते अस्ति।
- यदि विधानमण्डलं द्विसदनीयम् अस्ति, चेत् विधेयकः विधानसभातः विधानपरिषद् प्रति गच्छति। यदि तत्र स्वीकारः न भवति, तदा विधेयकस्योपरि मासत्रयं यावत् किमपि संशोधनं शक्यं नास्ति।
- विधानसभायाः राज्यस्य वित्तविभागस्य उपरि नियन्त्रणं भवति। धनविधेयकः केवलं विधानसभायां प्रस्तुतः भवति।
- विधानसभायाः स्वीकृतिं विना राज्यसर्वकारः कञ्चनमपि आयकरं स्थापयितुं न शक्नोति।
- राज्यसर्वकारः विधानसभायाः सम्मतिं विना प्रजाधनस्य व्ययमपि कर्तुं न शक्नोति।
- विधानसभा मन्त्रीमण्डलं प्रति अविश्वासस्य प्रस्तावं स्थापयितुं शक्नोति।
- विधानसभासदस्याः यं कमपि मन्त्रीणः प्रश्नं प्रतिप्रश्नं पुरकप्रश्नं च कर्तुं स्वतन्त्राः सन्ति।

**कतिपय विधानसभानां स्थानानाम् आवलिः**

| विधानसभा | राजधानी | स्थानसङ्ख्या |
|---|---|---|
| आन्ध्रप्रदेशविधानसभा | हैदराबाद | १७५ |
| अरुणाचलप्रदेशविधानसभा | इटानगरम् | ६० |
| असमविधानसभा | दिसपुर | १२६ |
| बिहारविधानसभा | पटना | २४३ |
| छत्तीसगढ़विधानसभा | रायपुर | ९० |
| दिल्लीविधानसभा | नयी दिल्ली | ७० |
| गोवाविधानसभा | पणजी | ४० |
| गुजरातविधानसभा | गान्धीनगरम् | १८२ |

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) ......... प्रजा राजा भवति। (अर्थतन्त्रे, समाजे, प्रजातन्त्रे)

(२) राज्यस्य उपरितनं गृहं ......... अस्ति। (धारासभा, राज्यसभा, विधानपरिषद्)

(३) निर्वाचनस्य प्रक्रिया ......... द्वारा भवति। (राष्ट्रपति, सर्वकार, निर्वाचनायोग)

(४) भारतस्य ......... राज्येषु विधानपरिषद् अस्ति। (पञ्चसु, षट्सु, सप्तसु)

(५) मतदानार्थं न्यूनतमवयः ......... अस्ति। (१६, १८, २२)

(६) गुजराते ......... धारासभास्थानानि सन्ति। (१८२, १८४, १९०)

(७) गुजराते ......... अस्ति। (धारासभा, विधानपरिषत्, उभयम्)

(८) धारासभा राज्यस्य ......... अस्ति। (उपरितनं, अधस्तनं, न कोऽपि)

(९) उत्तरप्रदेशे ......... धारासभास्थानानि सन्ति। (४०३, ४०५, ४००)

(१०) भारते आहत्य धारासभास्थानानि ......... सन्ति। (४१११, ४१२०, ५०००)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) आपदि कः विधानसभायाः विसर्जनं कर्तुं शक्नोति ?

(२) एकस्मिन् राज्ये अधिकाधिकं कति धारासभासदस्याः भवितुं शक्नुवन्ति ?

(३) के राज्यसभायां राज्यस्य प्रतिनिधित्वं कुर्वन्ति ?

(४) केषु राज्येषु धारासभा, विधानपरिषद् च स्तः ?

(५) धारासभा अर्थात् किम् ?

(६) धारासभायाः कार्यकालः कति वर्षात्मकः अस्ति ?

(७) धारासभायाः निर्वाचनं कदा भवति ?

(८) प्रजातन्त्रम् अर्थात् किम् ?

(९) राष्ट्रपतिशासने कः राज्यस्य सञ्चालनं करोति ?

(१०) विधानसभायाः अध्यक्षस्य नियुक्तिं के कुर्वन्ति ?

### ३. टिप्पणीं लिखन्तु।

(१) धारासभायाः निर्वाचनपद्धतिः।

(२) धारासभायाः कार्यम्।

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) कः धारासभायाः सदस्यम् भवितुम् आवेदनं कर्तुं शक्नोति ?

(२) धारासभायाः बन्धारणं वर्णयत।

५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) गोवा | (१) १२६ धारासभास्थानानि |
| (२) असमराज्यम् | (२) पणजी |
| (३) अरुणाचलराज्यम् | (३) ७० धारासभास्थानानि |
| (४) धारासभा | (४) इटानगरम् |
| (५) दिल्ली | (५) विधानसभा |

**छात्रप्रवृत्तिः**

- सङ्गणकमाध्यमेन विधानसभासत्रं द्रष्टव्यं तथा आवश्यकलेखस्य निर्माणं कर्तव्यम्।

**सुभाषितम्**

**राजा राष्ट्रकृतं पापं राज्ञः पापं पुरोहितः।**
**भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुस्तथा॥**
**चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि विद्यात्।**
**अल्पप्रज्ञैः सह मन्त्रं न कुर्यात् दीर्घसूत्रैरभसैश्चारणैश्च॥**

| ८ | # मानवसंसाधनम् |
|---|---|

## प्रस्तावना

मानवसंसाधनविकास: एका संरचना वर्तते, यत्र सङ्घटनस्य राष्ट्रस्य विविधानां लक्ष्यानां पूर्तये कार्याणि भवन्ति, तथा व्यक्तिविशेषस्य अपि विकास: जायते।

व्यक्तिविकासेन व्यक्तिविशेषस्य सङ्घटनस्य च लाभ: जायते।

शिक्षायां प्रशिक्षणे चिकित्सासेवायां च निवेशने जनसङ्ख्यां मानवसंसाधनरूपे परिवर्तितुं शक्यते।

## जनसङ्ख्या एवं निर्धनता -

भारतीयार्थव्यवस्था विश्वस्य प्रमुखा विकसिता च अर्थव्यवस्था वर्तते। भारतदेश: विश्वे आर्थिकमहासत्तां प्रति गच्छति, किन्तु भारतस्य जनसङ्ख्या अपि अस्माकं कृते विकटा समस्या वर्तते। यत: सर्वकारस्य योजनासु वञ्चिता: जना: समयान्तरे निर्धनतां प्रति गच्छन्ति। किन्तु World Poverty clock नाम्न्या: संस्थाया: संशोधनानुसारं प्रति एकनिमिषं ४४ (चतुश्चत्वारिंशत्) भारतीयजना: निर्धनतासीमात: निर्गच्छन्ति। इदानीन्तने समये (73 Million) जना: निर्धनतासीमात: अध: अत्यन्तं निर्धनतायां जीवनं यापयन्ति। जनसङ्ख्याया: दशप्रतिशतं जना: निर्धनतया जीवनं यापयन्ति।

## जनगणना -

१८७२ तमे वर्षे ब्रिटिशशासनकाले भारते सर्वप्रथमं जनगणना कृता। स्वतन्त्रतानन्तरं प्रतिदशवर्षानन्तरं गणना क्रियते। १९५१ वर्षादारभ्य जनगणना गृहमन्त्रालयेन दशवर्षे क्रियते।

भारतदेशे ५,९३,७३१ ग्रामा: सन्ति। तेषु भारतस्य ७२.२ % प्रतिशतं जना: निवसन्ति। गच्छता कालेन जना: महानगरं प्रति आगता: अत: महानगरेषु जनसङ्ख्यायां वृद्धि: दृश्यते।

उत्तरप्रदेश-महाराष्ट्र-बिहार-पश्चिमबङ्गाल आन्ध्रप्रदेशराज्येषु भारतस्य ४८.८४ प्रतिशतं जना: निवसन्ति।

२०११ वर्षस्य जनगणनानुसारं भारते १,२१,०१,९३,४२२ जना: निवसन्ति।

## साक्षरता -

अक्षरज्ञानेन विना देशस्य उन्नति: असाध्या इति आलोच्य साक्षरान्दोलनं प्रवर्तितमस्ति। भारतदेशस्य जनसङ्ख्या १९९१ तमे वर्षे ८४ कोटिपरिमिता आसीत्। २०१३ तमे वर्षे १२१ कोटिपरिमिता जाता। भारते सप्ततिप्रतिशतं (७० %) जना: साक्षरा: सन्ति। पुरुषा: अधिकप्रमाणेन साक्षरा: सन्ति। किन्तु स्त्रिय: ४० प्रतिशतं साक्षरा: इति दु:खस्य विषय: अस्ति। केरलराज्ये सर्वे जना: साक्षरा: इति तु अतीवमहत्त्वपूर्ण: विषय: अस्ति। जना: विविधक्षेत्रेषु कार्यं कुर्वन्ति। देशस्य अभिवृद्धिविषये साक्षरता महत्त्वपूर्णा भवति। साक्षरा: जना: एव स्वकीयं जीवनम् उत्तमरीत्या कल्पयन्ति इति तु सदा सत्यम् अस्ति। साक्षरता सर्वेषां जनानां कृते आवश्यकी एव। भारतीयसंविधाने सर्वेषां जनानां प्राथमिकं शिक्षणम् अनिवार्यं (RTE) कृतमस्ति।

भारते सर्वेषां जनानाम् अक्षरज्ञानाय सर्वकारेणापि विविधा: योजना: आरभन्ते।

प्राथमिकशिक्षा अनिवार्या कृता अस्ति। तत्र चतुर्दशवर्षपर्यन्तं बाला: शिक्षाप्राप्तये अर्हा: भवन्ति। सर्वे बाला: शिक्षां प्राप्नुयु: इति सर्वकारा: अनेकानि प्रोत्साहककार्याणि कुर्वन्त: सन्ति। तदर्थं 'मध्याह्नभोजनव्यवस्था' सर्वकारै: कृता अस्ति।

जनसङ्ख्याया: सप्ततिप्रतिशतं जना: मध्यवयस्का: सन्ति। एतेषु बहव: अशिक्षिता:। एतेषां शिक्षणार्थं 'वयस्कशिक्षणम्' इति योजना आरब्धा अस्ति। ''रात्रिशाला'' इति कार्यक्रमे निरक्षराणाम् अक्षरज्ञानाय प्रशिक्षणं प्रचलति।

**जनसङ्ख्यावृद्धिः -**

स्वतन्त्रतानन्तरं भारते विश्वस्य तुलनया अधिकजनसङ्ख्यावृद्धिः अप्राप्यत। २०२५ वर्षे कदाचित् भारतदेशः विश्वस्य जनसङ्ख्यायां प्रथमं स्थानं प्राप्स्यति।

जनसङ्ख्यावृद्धेः कारणानि।

(१) निर्धनता

(२) निरक्षरता

(३) अजागरूकता

(४) जातीयशिक्षणाभावः

भारते सामाजिककुरीतयः अपि जनसङ्ख्यावृद्धये प्रमुखतां भजन्ते। संयुक्तराष्ट्रविकासयोजनान्तर्गते (United Nation Development Programme) एकस्मिन् संशोधने भारतस्य निर्धनता २००५/०६ तः २०१५/१६ दशवर्षाभ्यन्तरं (271 Million) जनाः निर्धनतासीमातः निर्गताः।

**जनसङ्ख्या एवं विकासः -**

विकसितराष्ट्राणां विविधाः समस्याः भवन्ति, तेष्वेकः जनसङ्ख्या एवं तेषां विकासः। देशस्य विकासाय वर्तमानकालीनाः, भविष्यकालीनाः योजनाः निर्मातव्याः। अतः जनसङ्ख्यावृद्धिः केन कारणेन जायते, तस्य निराकरणं कृत्वा जनसङ्ख्यायाः विकासः करणीयः।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) विकसितराष्ट्राणां ......... वृद्धिः समस्या वर्तते। (जनसङ्ख्या, निरक्षरता, निर्धनता)

(२) ......... वर्षे प्रथमवारं जनगणना अभवत्। (१८७७, १८७२, १८७०)

(३) ......... प्रतिशतं जनाः ग्रामेषु निवसन्ति। (७२.३ %, ७२.४ %, ७२.२ %)

(४) ......... प्रतिशतं स्त्रियः साक्षराः सन्ति। (४० %, ५० %, ६० %)

(५) मानवसंसाधनविकासः एका ......... वर्तते। (संरचना, सङ्घठनः, सङ्ग्रहः)

(६) जनसङ्ख्यावृद्धेः ......... कारणानि सन्ति। (३, २, ४)

(७) ......... वर्षादारभ्य स्वतन्त्रभारते जनगणना आरब्धा। (१९५०, १९५१, १९४९)

(८) ......... वर्षानन्तरं (वर्षेषु) जनगणना जायते। (१०, २०, ५०)

(९) ......... प्रतिशतं स्त्रियः अशिक्षिताः सन्ति। (६० %, ५० %, ८० %)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) प्रति एकनिमिषं कति जनाः निर्धनतासीमातः निर्गच्छन्ति ?

(२) अत्यन्तनिर्धनतायां कति जनाः जीवन्ति ?

(३) केन विना देशस्य प्रगतिः न जायते ?

(४) भारते प्रथमं जनगणना केन कृता आसीत् ?

(५) भारते कति प्रतिशतं जनाः साक्षराः सन्ति ?

(६) भारतदेशे कति ग्रामाः सन्ति ?

(७) अधिकाः जनाः केषु राज्येषु निवसन्ति ?

(८) कति वर्षपर्यन्तं बाला: शिक्षां प्राप्स्यन्ति ?

(९) २०११ वर्षस्य भारतस्य जनसङ्ख्यां प्रतिपादयन्तु ?

(१०) भारते कति प्रतिशतं जना: अशिक्षिता: ?

### ३. टिप्पणीं लिखन्तु।

(१) जनसङ्ख्या एवं निर्धनता विषये लिखन्तु।

(२) साक्षरताविषये दशवाक्यानि लिखन्तु।

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) जनसङ्ख्यावृद्धि: इति विषये लिखन्तु।

(२) जनगणनाविषये लिखन्तु।

### ५. संयोजनं कुरुत।

| अ | ब |
| --- | --- |
| (१) १९५१ | (१) ८४ कोटिजना: |
| (२) १९९१ | (२) जनगणना |
| (३) २०१३ | (३) मध्यवयस्का: |
| (४) ७० % | (४) १२० कोटिजना: |
| (५) १० % | (५) निर्धनतायां जीवन्ति |

**छात्रप्रवृत्ति:**

- ग्रामपञ्चायतस्य साक्षात्कारं कृत्वा ग्रामजनसङ्ख्यां लिखित्व शिक्षकाय दद्यु:।

**सुभाषितम्**

**विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपद्यते पत्तये।**
**आद्या हास्याय वृद्धत्वे द्वितीयाऽद्रियते सदा॥**

# ९ अस्माकमधिकाराः कर्तव्यानि च

## प्रस्तावना

अस्माकं देशे लोकतान्त्रिकशासनप्रणाली प्रचलति। अस्माकं संविधानस्यामुखेन सर्वेभ्यः भारतीयेभ्यः मूलभूताधिकाराः प्रदत्ताः सन्ति। अधिकारप्राप्तिः नागरिकतायाः अनिवार्यं लक्षणम् अस्ति। मानवाधिकारस्य वैश्विकघोषणापत्रं सर्वेभ्यः कमपि भेदभावं विना मानवीयाधिकारं प्रददाति। संविधानस्य अनेन घोषणापत्रेण सर्वेभ्यः नागरिकेभ्यः दत्ताः मूलाधिकाराः लोकतान्त्रिकशासनप्रणाल्याः परिचायकाः सन्ति। मूलाधिकाराः सर्वेषां कृते सुरक्षाप्रदानस्य विश्वासं वर्धयन्ति। भारतीयसंविधानस्य तृतीयविभागे भारतस्य सर्वेभ्यः जनेभ्यः कमपि भेदभावं विना षड्-मूलभूताधिकाराः प्रदत्ताः सन्ति। तेषु अत्र समानताधिकारः, स्वतन्त्रताधिकारः, धार्मिकाधिकारः, शिक्षाधिकारः च एतेषां विषये अभ्यासं कृत्वा अस्माकं कर्तव्यानां विषये ज्ञानं लप्स्यामहे।

## समानताधिकारः

मूलभूतानेन अधिकारेण भारतदेशे निवसतां जनानां धर्म-ज्ञाति-लिङ्ग-जन्मस्थान-आजीविका-शिक्षणादिषु भेदभावः न भवेत्। सर्वेषां जनानां कृते विधेः व्यवहारः समानः भवेत्। अयम् अधिकारः भारतस्य सर्वेभ्यः नागरिकेभ्यः आपणेषु, अल्पाहारगृहेषु, मनोरञ्जनस्थानेषु प्रवेशाय उपयोगाय च समानम् अधिकारं प्रददाति। राष्ट्रियमार्गाणाम्, तडाग-कूप-नदीनाम् उपयोगाय समानतया अधिकारः वर्तते।

स्वतन्त्रतायाः प्राप्तेः अनन्तरं विविधक्षेत्रेषु विशिष्टप्रदानकर्तृकेभ्यः, विशेषसिद्धिप्राप्तजनेभ्यः च सर्वकारः 'भारतरत्नम्', 'पद्मभूषणम्', 'पद्मविभूषणम्', 'पद्मश्रीः' इत्यादयः पदवीः प्रदाय समानताधिकारस्य एव पालनं करोति। सेनायाम् अपि विशिष्टसेवार्थं 'परमवीरचक्रम्' प्रदीयते।

समानताधिकारेण समाजे समानतायाः स्थापनायाः उद्देश्यम् एवं च भारतदेशे 'विधेः शासनं प्रचलति' इति सिद्ध्यति।

## स्वतन्त्रताधिकारः

भारतीयसंविधानद्वारा भारतीयनागरिकेभ्यः षट् स्वतन्त्रताधिकाराः प्रदत्ताः सन्ति।

(१) वाण्याः अभिवक्तेः च स्वतन्त्रता।

(२) शान्तिसहितं विना शस्त्रैः सम्मेलनस्य स्वतन्त्रता।

(३) सङ्घ-मण्डलस्थापनाया स्वतन्त्रता।

(४) देशे कुत्रापि गमनागमनस्य स्वतन्त्रता।

(५) भारतदेशे कुत्रापि निवासाय स्वतन्त्रता।

(६) आजीविका-प्राप्त्यै स्वक्षमता-अनुसारं व्यवसायस्य स्वतन्त्रता।

भारतीयनागरिकाणां सर्वतोमुखी-विकासाय अभिव्यक्त्यै लोकतन्त्रस्य सुचारुसञ्चालनाय, स्वस्थजीवनाय च स्वतन्त्रताधिकारः वर्तते। नागरिकाः स्वकीय-विचारान् वाणीद्वारा, लिखितरूपेण, मौखिकरूपेण, अभिनयरूपेण वा प्रकटयितुं शक्नुवन्ति। किन्तु निरङ्कुशानि, मर्यादारहितानि वचनानि प्रकटयितुं न शक्नुवन्ति। अतः संविधानेन नियमाः रचिताः। तासां पालनपूर्वकं जनैः स्वतन्त्रताधिकारः भोक्तव्यः नान्यथा।

भारतदेशस्य सार्वभौमत्वम्, अखण्डत्वम्, संरक्षणं च पालयन् जनानां मध्ये शान्तिं-नीतिमत्तां-शिष्टतां-मित्रतां-विवर्धयन् स्वतन्त्राधिकारः भोक्तव्यः।

दोषी न्यायालये स्वकीयं पक्षं प्रस्थापयितुं न्यायवादिनं नियुक्तं कर्तुं शक्नोति इत्यपि स्वतन्त्रताधिकारे एव वर्तते।

## धार्मिकाधिकारः

भारतदेशः धर्मनिरपेक्षः देशः वर्तते। भारतस्य संविधानेन भारतदेशे निवसद्भ्यः मानवेभ्यः धार्मिकाधिकारः प्रदत्तः वर्तते। भारतस्य कोऽपि नागरिकः स्व-अन्तःकरणानुसारं कस्यापि धर्मस्य पालनं कर्तुं शक्नोति। एषः तस्य

धार्मिकाधिकारः वर्तते। तस्य धर्मस्य प्रचार-प्रसारं कर्तुं शक्नोति। तस्य धर्मानुसारं क्रियाकाण्ड-प्रार्थना-पूजायाः च स्वतन्त्रता अपि प्राप्यते। किन्तु जनानां स्वतन्त्रता-नीतिमत्ता-स्वास्थ्यादिषु अवरोधः न भवेत् इत्यादीनां नियन्त्रणानां पालनपूर्वकम् एव धार्मिकाधिकारः प्राप्यते अन्यथा न।

भारतदेशे विविधानि राज्यानि सन्ति। राज्यस्य स्वस्य कोऽपि धर्मः नास्ति। राज्यानि कस्यापि समुदायस्य धार्मिकमान्यतासु हस्तक्षेपम् न करिष्यन्ति। धर्मस्य संरक्षणाय प्रचार-प्रसाराय जनानां सेवायै च संस्थासंस्थापनार्थं धार्मिक-समूहाः स्वतन्त्राः सन्ति। एतासां संस्थानां सञ्चालनं धार्मिकसमूहाः कर्तुं शक्नुवन्ति। सर्वकारस्य अनुदानेन सञ्चाल्यमानासु शैक्षणिकसंस्थासु धार्मिकं शिक्षणं दातुं न शक्यते। सर्वकारस्य संपत्तेः उपयोगः कस्यापि धर्मस्य लाभाय अभिवृद्धियर्थं वा कर्तुं न शक्यते।

### शिक्षाधिकारः

अस्माकं भारते देशे विविधाः धर्माः, विविधाः भाषाः संस्कृतयः च सन्ति। प्रदेशेषु निवसतां जनानां भाषा-लिपि-संस्कृत-आदीनां रक्षणं कर्तुं वर्गसमूहाः स्वतन्त्राः सन्ति। सर्वकारस्य अनुदानेन प्रचालितासु शैक्षणिकसंस्थासु धर्म-ज्ञाति-लिङ्ग-भाषादीनां भेदभावं विना भारतीयनागरिकः प्रवेशम् अर्हति। कापि संस्था प्रवेशावरोधं कर्तुं न शक्नोति। इति भारतीयनागरिकस्य शिक्षाधिकारः वर्तते।

राज्यानि संविधानानुसारं विधिं (ધારો/કાયદો) संस्थाप्य संस्कृति-भाषानुसारं रचिताय लघुमतिवर्गसमूहाय शिक्षणसंस्थास्थापनाय सञ्चालनं कर्तुं च अधिकारं दास्यन्ति।

संविधानेन मूलभूताधिकाराः अस्मभ्यं प्रदत्ताः सन्ति। तान् अधिकारान् वयं पूर्णतया प्राप्नुयाम, तदर्थं संविधानस्य ज्ञानम् आवश्यकम् अस्ति। एवं संविधानस्य समाजस्य च सामान्यसम्बन्धं ज्ञात्वा राज्यसम्बन्धितस्वाधिकाराणाम् उपभोगं कृत्वा स्वसमाजस्य राज्यस्य चोत्थानम् अस्माकम् उत्तरदायित्वम् अस्ति।

भारतसर्वकारेण १० दिसम्बरः 'मानवाधिकारदिवसः' इति उद्घोषितः अस्ति।

भारतदेशस्य सर्वेऽपि नागरिकाः मूलभूताधिकारान् उपभुञ्जते एव। कस्यापि एकस्य अधिकारस्य भङ्गः, अनवाप्तिः, अन्यायः (विरोधाधिकारः) वा भवेत् तदा नागरिकाः न्यायलयं गत्वा स्वाधिकाराणां पुनःप्राप्तिं कर्तुं शक्नुवन्ति। नागरिकाः एभ्यः अधिकारेभ्यः स्वकीयाधिकाराणां रक्षणाय उच्चन्यायालयम् अथवा सर्वोच्चन्यायालयं गन्तुम् अर्हन्ति। न्यायतन्त्रस्यापि इदं कर्तव्यम् अस्ति यत् नागरिकाणां मूलभूताधिकारान् रक्षेत्। अन्यदेशापेक्षया भारतीयसंविधानेन दत्तः अयम् अधिकारः महत्त्वपूर्णः न्यायिकः च अस्ति।

### कर्तव्यानि

प्राचीनकालादेव अस्माकं भारते देशे जनाः अधिकारापेक्षया कर्तव्यपालने विशेषरूपेण सज्जाः आसन्। यथा मानवानां मूलभूताधिकाराः सन्ति, तथा एव मूलभूतकर्तव्यानि अपि सन्ति। १९७६ तमे वर्षे संविधाने कर्तव्यपालनस्य नियमानां समावेशः कृतः। एतेषां कर्तव्यानां हेतुः देशप्रेम-राष्ट्रभावना-उच्चादर्श-प्राप्तिः, सन्मूल्यानां वृद्धिः जनेषु स्यात् इति अस्ति। देशस्य एकता, अखंडता, सार्वभौमत्वम्, इत्यादीनां संरक्षणाय जनाः स्वकीयं योगदानं प्रदद्युः। देशे-समाजे शान्ति-विश्वास-संरक्षण-सद्भावना-संवादिता-स्थापनम् एव प्रत्येकस्य नागरिकस्य प्रथमं कर्तव्यमस्ति तथैव अन्यानि कर्तव्यानि अधोदत्तानि सन्ति।

(१) संविधानस्य पालनं करणीयम्, संविधाने दर्शितादर्शानां संस्थानां वा राष्ट्रगीतस्य, राष्ट्रध्वजस्य च आदरः करणीयः।

(२) स्वातन्त्र्यसंग्रामस्य उदात्तविचाराणां प्रेरकादर्शानां समादरपूर्वकम् अनुसरणम्।

(३) भारतदेशस्य सार्वभौमत्वस्य एकतायाः अखण्डतायाः समर्थनं कृत्वा संरक्षणं करणीयम्।

(४) देशरक्षणाय राष्ट्रसेवां कर्तुं सोत्साहं उद्यताः स्युः।

(५) राष्ट्रस्य समृद्ध-समन्वित-सांस्कृतिकसम्पत्तेः रक्षणं करणीयम्।

(६) देशे भ्रातृभावस्य वृद्धिः करणीया, जनानां मध्ये सुसंवादिता स्थापनीया, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च करणीयः।

(७) वनानाम्, तडागानाम्, नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तत्संशोधनाय तथा जीवमात्रं प्रति अनुकम्पाभावः धारणीयः।

(८) वैज्ञानिकाभिगमस्य, मानववादस्य, शोधप्रवृत्तेः च विकासः करणीयः।

(९) सामान्यसम्पत्तेः रक्षणं करणीयम्, हिंसायाः त्यागः च कार्यः।

(१०) राष्ट्रं पुरुषार्थस्य सिद्धेः अधिकाधिकम् उन्नतसोपानानि प्रति प्रगतिशीलं स्यात्, एतदर्थं वैयक्तिक-सामूहिक-प्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वं प्राप्तुं प्रयत्नः करणीयः।

(११) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

भारतदेशेन ६ जनवरी 'मूलभूतकर्तव्यदिवसः' इति समुद्घोषितः वर्तते।

कर्तव्यपालनाय जनाः सज्जाः भवेयुः एतदर्थं सर्वैः शिक्षकैः प्रयत्नः करणीयः। समाजे प्रवर्तितानां दूषणानाम् अनिष्टानां च दूरीकरणाय नागरिकाः सज्जाः भवेयुः। अस्पृश्यता, बालशोषणम्, स्त्रीशोषणम्, स्त्रीभ्रूणहत्या, अन्धश्रद्धा इत्यादीनां दोषाणां नाशोऽस्तु इत्यपि नागरिकाणां कर्तव्यमस्ति। कर्तव्यपालनस्य सततम्, सुद्रढं शिक्षणं वर्तमानच्छात्रेभ्यः प्रदीयते चेत् देशस्य भाविनागरिकाः विश्वबन्धुत्वयुक्ताः, न्यायशीलाः, शोषणविहीनाः च स्युः।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) ......... मूलभूताधिकारेण भारतदेशे निवसतां जनानां मध्ये भेदभावं भवितुं नार्हति ?

(समानताधिकारेण, शिक्षाधिकारेण, धार्मिकाधिकारेण)

(२) भारतसर्वकारः ......... 'परमवीरचक्रं' प्रदीयते।

(समाजस्यविशिष्टसेवार्थम्, सर्वकारसेवायां विशेषसेवार्थम्, सेनायां विशेष्टसेवार्थम्)

(३) 'भारतदेशे कुत्रापि भारतीयनागरिकः गन्तुं शक्नोति' अत्र ......... मूलभूताधिकारः वर्तते।

(शिक्षाधिकारः, स्वतन्त्रताधिकारः, समानताधिकारः)

(४) पूर्णतया सर्वान् अधिकारान् लब्धुं ......... ज्ञानं आवश्यकम्। (संविधानस्य, ग्रन्थस्य, महाकाव्यस्य)

(५) प्राचीनकालादेव भारतदेशे जनाः ......... सज्जाः आसन्। (पशुपालने, कर्तव्यपालने, स्वहितपालने)

(६) भारतदेशे ......... शासनं प्रचलति। (सर्वकारस्य, राष्ट्रभक्तेः, विधेः)

(७) संविधानेन नागरिकेभ्यः ......... स्वतन्त्रताधिकाराः प्रदत्ताः। (सप्त, षट्, अष्ट)

(८) भारतदेशः ......... देशः वर्तते। (धर्मनिरपेक्षः, राजशासनयुक्तः, धार्मिकः)

(९) सर्वकारेण १० दिसम्बरः ......... दिननाम्ना उद्घोषितः अस्ति। (कर्तव्यपालनः, मानवाधिकारः, शिक्षाधिकारः)

(१०) भारतदेशेन ......... जनवरी मूलभूतकर्तव्यदिवस इति समुद्घोषितः। (५, ६, ७)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) केषाम् उपयोगाय समानतया अधिकारः वर्तते ?

(२) विशेषसिद्धिप्राप्तजनेभ्यः भारतसर्वकारेण काः पदव्यः प्रदीयन्ते ?

(३) लोकतन्त्रस्य सुचारुसञ्चालनाय कः मूलभूताधिकारः वर्तते ?

(४) केषां नियन्त्रणानां पालनपूर्वकं धार्मिकाधिकारः पालनीयः ?

(५) नागरिकः कुत्र गत्वा स्वाधिकाराणां पुनःप्राप्तिं कर्तुं शक्नोति ?

(६) कर्तव्यानां हेतुः कः अस्ति ?

### ३. टिप्पणीं लिखन्तु।

(१) समानताधिकारः

(२) धार्मिकाधिकारः

(३) शिक्षाधिकारः

### ४. सविस्तरम् उत्तरं लिखन्तु।

(१) अस्माकं मूलभूताधिकाराणां नामानि विलिख्य तेषां विषये स्पष्टीकरणं कुर्वन्तु।

(२) अस्माकं कर्तव्यानि क्रमेण लिखन्तु।

(३) स्वतन्त्रताधिकारविषये विस्तरेण स्पष्टीकरणं कुर्वन्तु।

### ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) समानताधिकारः | (१) भाषा-संस्कृतिरक्षणायाधिकारः |
| (२) स्वतन्त्रताधिकारः | (२) प्रार्थना-पूजायाः स्वतन्त्रता |
| (३) धार्मिकाधिकारः | (३) सामान्यसम्पत्तेः रक्षणम् |
| (४) शिक्षाधिकारः | (४) आपणेषु प्रवेशाय समानः |
| (५) अस्माकं कर्तव्यम् | (५) सङ्घ-मण्डलस्थापनाधिकारः |

**छात्रप्रवृत्तिः**

- वेदेषु स्मृतिषु ये मानवाधिकाराः सन्ति तान् छात्राः जानीयुः।
- वेदेषु स्मृतिषु यानि मानवस्य कर्तव्यानि वर्णितानि सन्ति तानि प्रार्थनासभायां प्रकटयेपुः।

**सुभाषितम्**

**कर्तव्यमेव कर्तव्यम् प्राणैः कण्ठगतैरपि।**
**अकर्तव्यम् नैव कर्तव्यम् प्राणैः कण्ठगतैरपि।**

# १० पृथ्वी

## प्रस्तावना

सूर्यमण्डले पृथ्वी तृतीये क्रमाङ्के स्थिता वर्तते। पृथ्वीग्रहः सौरमण्डलस्य पञ्चमबृहत्तमः ग्रहः अस्ति। जीवनाय अनुकूलाः परिस्थितयः पृथिव्याम् एव सन्ति। पृथ्वी अधिकोष्णा नास्ति, अधिकशीतलापि नास्ति पृथिव्यां वायुः, जलं च अस्ति। अत्र प्राणवायुः अपि वर्तते, येन जीवनतन्त्रं चलति। अनेन कारणेन पृथ्वी सौरमण्डलस्य अद्भुतः ग्रहः विद्यते।

## पृथिव्याः उत्पत्तिः

पृथिव्याः उत्पत्तिविषये संशोधनाय बहवः वैज्ञानिकाः कार्यरताः आसन्। इदानीमपि वैज्ञानिकाः संशोधने कार्यरताः सन्ति। पृथिव्याः उत्पत्तिविषये वैज्ञानिकानां, दार्शनिकानां च बहूनि मतानि सन्ति।

- १९७६ तमे वर्षे लाप्सेस् नामकेन महोदयेन गणितज्ञेन पृथिव्याः उत्पत्तिविषये संशोधनं कृतम् आसीत्। तत् संशोधनं निहारिकापरिकल्पना। (Nebular Hypothesis) इति उच्यते। अस्याः परिकल्पनायाः अनुसारं ग्रहाणां निर्माणं कैश्चित् पदार्थैः अभवत्। अन्तरिक्षे ते पदार्थाः मन्दं मन्दं भ्रमन्ति। ततः तेषां पदार्थानां सम्मेलने ग्रहाणाम् निर्माणं जातम्।
- १९०० तमे वर्षे चेम्बरलेन, मोल्टन् च इत्याख्याभ्याम् उक्तम् यत् किञ्चित् भ्रमणशीलं नक्षत्रं ब्रह्माण्डे भ्रमत् आसीत्। तदा तन्नक्षत्रं सूर्यस्य समीपं गतवत्। नक्षत्रस्य गुरुत्वाकर्षणबलेन सूर्यात् कश्चित् लघुखण्डः पृथगभवत्। यदा नक्षत्रं सूर्यात् दूरं गतवत्, तदा अयं लघुखण्डः सूर्यं परितः एव भ्रमणम् आरभत। समयान्तरे लघुखण्डः ग्रहे रूपान्तरितः जातः।
- सूर्यस्य समीपं मित्रनक्षत्रं भ्रमति स्म इति अपि केषाञ्चित् मतम् अस्ति। अयं तर्कः ''द्वैतारक-सिद्धान्तः'' (Binaru Theories) इति नाम्ना प्रसिद्धः अस्ति।

## पौराणिकमान्यता

भारतीयपरम्परायां विश्वस्य उत्पत्तिविषये बहवः कथाः प्रचलन्ति, किन्तु सर्वशास्त्राणां प्रदीपे श्रीमद्भागवतपुराणे पृथिव्याः उत्पत्तिविषये ज्ञानं लभते। यथा पुराणस्य द्वितीयस्कन्धस्य पञ्चमाध्याये सृष्टेः सर्जनस्य कथा वर्णिता वर्तते।

''तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः।

सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥'' ( २-५-३३ भा.पु. )

भगवत्प्रेरणया पञ्चभूतानि, सर्वाणि इन्द्रियाणि सत्वादिगुणाश्च परस्परस्य विरुद्धभावान् त्यक्त्वा सृष्टिनिर्माणाय सम्मिलिताः आसन्। तदनन्तरम् एतेषां कार्य-कारणभावात् ब्रह्माण्डस्य रचना जाता।

''स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः।

सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥''

सृष्टिनिर्माणानन्तरं ब्रह्माण्डस्वरूपात् अण्डात् विराट्पुरुषस्य सर्वाणि अङ्गानि सन्ति।

वेदेऽपि विराट्पुरुषस्य वर्णनं प्राप्यते। पुरुषसूक्तेऽपि सृष्टेः उत्पत्तिः वर्णिता वर्तते। शास्त्रमनुसृत्य एतद् कथयितुं शक्यते यद् शास्त्रे कथारूपेण वैज्ञानिकसिद्धान्तानां जनसामान्यस्य ज्ञानाय प्रतिपादितं वर्तते।

## ग्रहाः एवं पृथिवी

### बुधः



बुधः चतुर्थः ग्रहः विद्यते।

बुधः सूर्यमण्डले सूर्यस्य अत्यन्तं समीपे स्थितः ग्रहः। अपि च सूर्यमण्डले स्थितेषु ग्रहेषु कनिष्ठः अस्ति। सूर्यान्तिकात् अयं ग्रहः स्फुटतया द्रष्टुं न शक्यते। अस्य ग्रहस्य विषये अद्यापि स्पष्टतया विवरणं न उपलभ्यते।

बुधः सूर्यं प्रति परिभ्रमणाय ८८ दिनानि स्वीकरोति। बुधः आकारे अस्माकं चन्द्रः इव अस्ति। बुधस्य कोऽपि नैसर्गिकः उपग्रहः नास्ति।



### शुक्रः

सूर्यात् द्वितीयः समीपे स्थितः ग्रहः अस्ति। सः २२४.७ दिनेषु सूर्यस्य परिक्रमणं करोति। एषः रात्रौ गगने अत्यन्तं प्रकाशमानेषु कार्येषु चन्द्रस्य अनन्तरं तिष्ठति।

### मङ्गलः



मङ्गलः सूर्यमण्डलस्य तृतीयः ग्रहः अस्ति। मङ्गलस्य वर्णः रक्तः अस्ति। अस्य ग्रहस्य वातावरणे स्वस्य भ्रमणाय अयं ग्रहः ३७ निमेषाधिक २४ घण्टां स्वीकरोति। अस्य फोबोस् – डैमोस् नामकौ द्वौ उपग्रहौ स्तः।



### पृथ्वी

सूर्यमण्डलस्य जीवनतन्त्रयुक्तः ग्रहः पृथ्वी वर्तते। अत्र सृष्टिनिर्माणाय उचितं वातावरणं वर्तते, येन कोटिवर्षपूर्वस्मात् जीवनम् आरभत। अत्र प्राणवायुः, नाइट्रोजन, ओझोन् इत्यादयः जीवनतन्त्रस्य सहायकाः वायवः सन्ति। पृथिव्याः चन्द्रनामकः एकः उपग्रहः वर्तते।

## गुरुः



सौरमण्डले गुरुः एव बृहत्तमः ग्रहः। सौरमण्डलस्य सर्वेषां ग्रहाणां द्रव्यराशेः २.५ गुणतः द्रव्यराशिः गुरोः। भूमेः अपेक्षया ३१८ गुणितं द्रव्यराशिः, ११ गुणितं व्यासः अतः गुरुग्रहस्य गुरुत्वं सौरमण्डलस्य विकासे महान्तं परिणामं जनयति।



## शनिः -

शनिः गुरुग्रहस्यापेक्षया बहिः चलति। अस्य ग्रहस्य वलयाः बृहन्तः भवन्ति। अयं ग्रहः भूमेः अपेक्षया ७९२ भागपूर्तिः बृहत् भवति। शनिः १० होरा १४ निमेषः २४ क्षणाय एकवारं स्वमार्गे परिक्रमति। अयं ग्रहः सूर्यम् एकवारं परिक्रमणं कर्तुं २९ वर्षाणि १९७ दिनानि अपेक्षन्ते।

## युरेनस्-ग्रहः



युरेनस् अरुणः इति, कुत्रचित् इन्द्रः इति च उल्लिखितः दृश्यते। युरेनस् इत्यस्य अपरं नाम हर्षलः वर्तते। अस्य ग्रहस्य अन्वेषणं १७८१ तमे वर्षे विलियम् हर्षेल् कृतवान्। अस्य ग्रहस्य पञ्च उपग्रहाः सन्ति।



## नेप्चुन् ग्रहः

नेप्चुन् इति नर्दिश्यमानः ग्रहः भारतीयचिन्तनक्रमे वरुणः इति कथ्यते। १८४६ तमे वर्षे अन्विष्टः अयं ग्रहः युरेनस् इव हरितवर्णीयः। अस्य ग्रहस्य द्वौ उपग्रहौ स्तः।

ग्रहेषु पृथिव्याम् एव जीवनं सम्भवम् अस्ति। यत: जीवनाय भूमे:, जलस्य, वायो: च आवश्यकता वर्तते। तानि सर्वाणि तत्त्वानि पृथिव्याम् उपलब्धानि सन्ति। पृथिव्या: पर्यावरणस्य त्रय: महत्त्वपूर्णा: घटका: परस्परं मिलन्ति परस्परं प्रभावयन्ति च।

## मृदावरणम्

पृथिव्या: कठोरभाग: भूमण्डल: इति कथ्यते। भूपर्पट्या: शिलानां मृत्तिकाया: च स्तरै: इदं मण्डलं निर्मितम् अस्ति। मण्डलेऽस्मिन् जीवेभ्य: पोषकतत्त्वानि प्राप्यन्ते अस्य भूमण्डलस्य भागद्वयं कृतम् अस्ति। महाद्वीपा: महासागरीया: च इति। विश्वस्य सर्वे महासागरा: परस्परं सम्बद्धा: सन्ति। समुद्रजलस्य तलम् अपि सर्वत्र समानम् एव भवति। समुद्रतलात् स्थलस्य औन्नत्यस्य मानं क्रियते।

अन्ये खगोलीयपिण्डा: लघुभारपदार्थानां मिश्रणै: निर्मिता: सन्ति। अत: बहूनाम् अणूनां मिश्रणेन ग्रहा: निर्मिता: जाता:। पृथिव्या: रचना अपि अनेन प्रकारेण एव अभवत्। तस्मिन् समये पदार्था: पिण्डेभ्य: प्रभाविता: जाता:, तेन कारणेन तेभ्य: ऊष्मा उत्पन्ना अभवत्। अत्यधिकतापेन पृथ्वी आंशिकरूपेण द्रवावस्थायां परिवर्तिता जाता। अनेन कारणेन भारयुता: पदार्था: पृथ्व्या: केन्द्रं गतवन्त:, यथा लौह: इत्यादय:। भारहीना: पदार्था: पृथ्व्या: उपरि आगतवन्त:। समयान्तरे ते पदार्था: शीतला: जाता:। कठोररूपे अपि परिवर्तिता: जाता:, अन्ते ते पदार्था: भूस्थलत्वेन स्थापिता: अभवन्।

## जलावरणम्

पृथ्वी नीलग्रह: अपि कथ्यते। पृथिव्या: जलभाग ७१ % स्थलभाग: २९ % अस्ति। जलमण्डले जलस्य सर्वाणि स्वरूपाणि भवन्ति। तेषु महासागरा:, नद्य:, सरोवरा:, हिमनद्य:, भूमिगतजलं, वायुमण्डलस्य जलबाष्प: च सम्मिलिता: सन्ति। पृथिव्यां स्थितस्य जलभागस्य ९७.३ % भाग: महासागरेषु अस्ति। तज्जलं मनुष्येभ्य: अनुपयोगि वर्तते। २.७७ % भाग: हिमनदीनां भूमिगतजलस्य हिमस्तराणां च स्वरूपेऽस्ति। ०.०३ % भागे एव लवणहीनं जलं वर्तते। मानवा: तस्य जलस्य उपयोगं कर्तुं शक्नुवन्ति।

## वातावरणम्

भूमि: वायुस्तरै: आवृता अस्ति, तत् वातावरणं कथ्यते। वायुस्तर: अस्य ग्रहस्य महत्त्वपूर्ण: भाग: वर्तते। वायुमण्डले बहव: वायव: सन्ति। मानवानां जीवनाय ते साहाय्यं कुर्वन्ति। वायुमण्डलं स्थलमण्डलात् १६०० कि.मी. पर्यन्तम् उन्नतम् अस्ति।

घटकानां तापमानस्य च आधारेण वायुमण्डलस्य पञ्चभागा: कृता:, ते यथा क्षोभमण्डलम्, समतापमण्डलम्, मध्यमण्डलम्, आयनमण्डलम्, बहिर्मण्डलं च।

नाइट्रोजन-ऑक्सीजन इत्येतौ द्वौ वायू वायुमण्डले मुख्यत्वेन स्त:। विस्तारानुसारेण वायुमण्डलस्य ७८ % भागे नाइट्रोजनवायु:, २१ % भागे ऑक्सीजनवायु:, १ % भागे अन्ये वायव: सन्ति। स्थलमण्डलात् औन्नत्ये वायुमण्डलस्य घनत्वे अपि भिन्नता भवति। समुद्रतले घनत्वस्य मात्रा सर्वाधिका वर्तते।

## जीवावरणम्

अस्मिन् आवरणे जीवनं शक्यम्। मण्डलेऽस्मिन् बह्वीनां प्रजातीनां जीवा: सन्ति। मनुष्यै: सह अन्ये प्राणिन: परस्परं जीवमण्डलै: सह सम्बद्धा: सन्ति।

पृथिव्या: पर्यावरणे त्रीणि मण्डलानि सन्ति। पृथिव्या: सर्वै: जीवधारिभि: जैवमण्डलस्य रचना अभवत्।

जैवमण्डलं जैवमण्डलानां घटका: च पर्यावरणस्य महत्त्वपूर्णानि तत्त्वानि सन्ति। एतानि तत्त्वानि भूम्या, जलेन, मृत्तिकया इत्यादिभि: सह पारस्परक्रियां कुर्वन्ति। जैविकघटकानां भूमिवायुजलै: सह परस्परम् आदानप्रदानं च जीवानां विकासाय साहाय्याय च कल्पते।

## स्वाध्यायः

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) सूर्यमण्डले पृथ्वी ......... क्रमाङ्के अस्ति। (द्वितीये, तृतीये, प्रथमे)

(२) कनिष्ठः ग्रहः ......... वर्तते। (बुधः, शुक्रः, शनिः)

(३) निहारिकापरिकल्पना ......... महोदयस्य संशोधनं वर्तते। (स्मिथ, लाप्सेस्, आईन्स्टाईन)

(४) ......... पुराणे पृथिव्याः विषये ज्ञानं प्राप्यते। (भागवते, वराहे, शिवपुराणे)

(५) ......... स्कन्धे सृष्टिसर्जनस्य कथा प्राप्यते। (तृतीये, द्वितीये, पञ्चमे)

(६) ......... सूक्ते सृष्टेः वर्णनं वर्तते। (अग्नि, पुरुष, सूर्य)

(७) शुक्रः ......... दिनेषु सूर्यस्य परिक्रमणं करोति। (२२४.७, २२५.८, २२६.७)

(८) ......... सूर्यस्य समीपे स्थितः वर्तते। (शुक्रः, बुधः, मङ्गलः)

(९) ......... ग्रहस्य वर्णः रक्तः अस्ति। (मङ्गल, बुध, गुरु)

(१०) ......... ग्रहस्य द्वौ उपग्रहौ स्तः। (शुक्र, भूमि, मङ्गल)

### २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) १९०० तमे वर्षे पृथिव्याः उत्पत्तिविषये कैः सिद्धान्ताः स्थापिताः ?

(२) शुक्रस्य उपग्रहस्य नाम लिखन्तु।

(३) भूमेः उपग्रहः कः ?

(४) सौरमण्डलस्य तृतीयः ग्रहः कः ?

(५) सौरमण्डलस्य बृहत्तमः ग्रहः कः ?

(६) शनिः सूर्यस्य परिक्रमणाय कियन्तं कालं स्वीकरोति ?

(७) ग्रहेषु कुत्र जीवनं सम्भवति ?

(८) पर्यावरणस्य कति घटकाः सन्ति ?

(९) जीवनाय केषाम् आवश्यकता वर्तते ?

(१०) सौरमण्डले कति ग्रहाः सन्ति ?

### ३. टिप्पणीं लिखन्तु।

(१) पृथिव्याः उत्पत्तेः पौराणिकमान्यतां प्रतिपादयन्तु।

(२) मृदावरणविषये स्वविचारान् लिखन्तु।

(३) जलावरणम् अर्थात् किम् ? इति लिखन्तु।

### ४. सविस्तरम् उत्तरं यच्छन्तु।

(१) पृथिव्याः उत्पत्तेः आधुनिकविचारान् प्रकटयन्तु।

(२) वातावरणस्य विवेचनं कुर्वन्तु।

## ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) पृथ्वी | (१) फोलोस् |
| (२) मङ्गलः | (२) चन्द्रः |
| (३) लाप्सेस् | (३) निहारिकापरिकल्पना |
| (४) सायंकालीननक्षत्रम् | (४) बुधः |
| (५) कनिष्ठग्रहः | (५) शुक्रः |

### छात्रप्रवृत्तिः

- ग्रहाणां चित्राणि निर्मीय वर्गखण्डे आनेयुः।

### सुभाषितम्

**दाने तपसि शौर्ये च विज्ञाने विनये नये।**
**विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा॥**

•

# ११ समुद्राः

## प्रस्तावना

महासागरः (जलनिकायः) लवणजलस्य विशालं स्रोतः वर्तते। पृथिव्याः ७० % प्रतिशतभागतः अधिकांशक्षेत्रे विस्तीर्णः लवणजलस्य निकायः वर्तते। अयं महासागरः जलवायु संयमनं कर्तुम् अत्यावश्यकभूमिकां परिवहति। वैश्विकजनेभ्यो मत्स्यमौक्तिकादिप्रदाने महासागरस्य महत्त्वपूर्णं योगदानं वर्तते दरीदृश्यते च। तथा च परिवहनक्षेत्रे सागरस्य अतीवश्रेष्ठतरा भूमिका गण्यते। एवमेव मानवजीवने महासागरस्य महत्त्वपूर्णः उपयोगः क्रियते। मानवसंस्कृतौ सागरस्य अधिकं महत्त्वं वर्तते। अयं महासागरः काल्पनिकदृष्ट्या पञ्चधा विभक्तः वर्तते। (१) प्रशान्तमहासागरः (२) अन्धमहासागरः (३) हिन्दमहासागरः (४) दक्षिणध्रुवीयमहासागरः (५) उत्तरध्रुवीयमहासागरः इत्येषाम् महासागराणां समासतः परिचयात्मकं वर्णनमत्र प्रस्तूयते।

## प्रशान्तमहासागरः (Pacific Ocean) -

वैज्ञानिकैः अन्वेषकैः साहसिकैर्नाविकैश्च प्रशान्तमहासागरस्य विषये विशेषज्ञानप्राप्त्यर्थं यत्नः कृतः, तथापि अस्याध्ययनम् अद्यापि प्रचलति। सर्वप्रथमं पेटरव्यूकमहोदयेन अस्मिन् विषये ज्ञानार्थं यत्नः कृतः आसीत्। तदनु बैकबोआ, मौयेमेनदान्या, होरिस (Horace), कुकु इत्यादियुरोपीयैः प्रयत्नः कृतः। द्वितीयमहाविश्वयुद्धानन्तरं संयुक्तराष्ट्रेण अस्मिन् विषये वित्तव्ययपूर्वकं नैके प्रयत्नाः कृताः। ते प्रयत्नाः पुञ्जीविनियोगस्य विकासार्थं लाभप्रदाः जाताः। अधुनापि प्रशान्तमहासागरस्य गर्भज्ञान-प्राप्त्यर्थं संशोधनं प्रचलति।

अस्य क्षेत्रफलं ६.३६.३४०० वर्गमीलम् अर्थात् एटलान्टिकमहासागरात् द्विगुणं ततोप्यधिकं वर्तते। विशालक्षेत्रफलत्वात् अत्रत्यनिवासीजनेषु, निवासादिक्रियासु, वनस्पत्यादिषु, पशुषु च वैविध्यं दृश्यते। अस्य सामान्यतया गहनता १४,००० हस्तपरिमिता (फूट) वर्तते। अधिकतमा गहनता ३५,४०० हस्तपरिमिता मन्यते। इयम् गहनता तबग्वेम एवं मिण्डानो इत्यस्य मध्ये अनुमीयते। अयं महासागरः एटलान्टिकमहासागरस्य सहवर्ती अस्ति।

अस्य पूर्वपश्चिमतटयोर्मध्ये महदन्तरं वर्तते। पूर्वतटे अत्यधिकाः पर्वताः वर्तन्ते। समुद्रक्रीडाङ्गणं (समुद्रीमैदान) अतीव लघु वर्तते। अनेन कारणेनात्र सुव्यवस्थितजलपोतस्थानस्य (बंदरगाह) अभावः वर्तते। तथा तत्रत्यसभ्यतायाः अपि अधिकतरोन्नतिर्न दृश्यते। बेरिंगजल डमरूमध्यं हिमाच्छादितं भवति। तेन कारणेन यातायाते विघ्नानि समायान्ति।

अस्य पश्चिमतटे पर्वतानामभावः वर्तते। तथा द्वीपानां लघुद्वीपानाम् आधिक्यं वर्तते। पश्चिमतटे जापान, फिलिपिंस्, हिण्डेशिया इत्यादिसामान्यतया (७०००) सप्तसहस्रं द्वीपाः सन्ति। अस्मिन् तटे विश्वस्य महत्यः महानद्यः प्रशान्तमहासागरस्य जले मिलन्ति। अस्य लघुद्वीपेषु (डेल्टा) अधिकतमजनसङ्ख्या निवसति, तथा च सुव्यवस्थितजलपोतस्थानकानि (बंदर) सन्ति।

प्रशान्तमहासागरस्याकृतिः त्रिभुजाकारमयी अस्ति। अस्य शीर्षं बेरिंगजल डमरूमध्ये वर्तते। सः अश्वखुराकृतिवत् दृश्यते। तथा ज्वालामुखीपर्वतैः तथा च लघुलघुपर्वतैरावृतः (बेसिनं) संरचयति। अस्य धरातलं प्रायः समतलं वर्तते। तथापि अस्य धरातलं मुख्यपश्चिमभागे महतीभिः उपत्यकाभिः (खाई) आवृत्तं वर्तते। तासु उपत्यकासु मरियाना ट्रेंच, टसेअरोरा. ३२,६४४ हस्तपरिमिता गहना वर्तते। रंपा ३४,६२६ हस्तपरिमिता, नैशे ३२,१०७ हस्तपरिमिता गहना वर्तते। ज्वारभाट अत्रत्या मुख्यविशेषता वर्तते, अयं नौकायात्रां प्रभावितां करोति।

प्रशान्तमहासागरस्य कर्करेखामकररेखयोर्मध्यवर्तीभागः मध्यप्रशान्तमहासागरः इति नाम्ना ख्यातः वर्तते। कर्करेखायाः उत्तरीयक्षेत्रं उत्तरप्रशान्तमहासागरः कथ्यते, तथा च मकररेखायाः दक्षिणस्थभागः दक्षिणप्रशान्तमहासागरः इति नाम्ना वर्ण्यते।

**अन्धमहासागरः (Atlentic Ocean) -**

अन्धमहासागरस्य अपरं नाम एटलान्टिकमहासागरः इत्यपि विद्यते। अस्य जलराशिः युरोपः एवम् आफ्रिकामहाद्वीपान् नूतनविश्वस्य-महाद्वीपेभ्यः पृथक् करोति। क्षेत्रफलम् एवं विस्तारदृष्ट्या विश्वस्मिन् द्वितीयस्थानकमस्य महासागरस्य वर्तते। यः पृथिव्याः १/५ क्षेत्रमावृत्य तिष्ठति। अस्य महासागरस्य नाम ग्रीकसंस्कृत्याः अधिगृहीतमस्ति। तस्यां संस्कृतौ अस्य नाम मानचित्रस्य समुद्रः (नकशे का समुद्र) इत्याख्यातम्।

अस्याकृतिः सामान्यतया आङ्ग्ल भाषायाः अष्टसङ्ख्याकस्याङ्क (8) इव अनुमीयते। तथास्य दीर्घतायाः (लंबाई) प्रमाणत्वात् ह्रस्वता (पहोडाइ) न्यूना (कम) अस्ति। बेरिंगजलडमरूमध्यतः उत्तरीयध्रुवं प्रति गम्यमानः तथा स्पिट्स, बर्जेन एवं ग्रीनलैण्ड पर्यन्तं व्याप्तः आर्कटिकसागरः मुख्यतया अन्धमहासागरस्यैव भागः वर्तते।

उत्तरदिशि जलडमरूमध्यतः दक्षिणदिशि कोट्सलैण्ड पर्यन्तं अस्य दीर्घता (लंबाई) १२१८० मील प्रमाणं वर्तते।

एवमेव दक्षिणदिशि दक्षिणजार्षिया इत्यस्य दक्षिणदिशि स्थितः वैडल समुद्रः अपि अस्य महासागरस्याङ्गं वर्तते।

अस्य महासागरस्य क्षेत्रफलं अस्यान्तर्गत समुद्रसहितं ४,१०,८१,०४० वर्गमील प्रमाणमस्ति। अस्यान्तर्गतसमुद्रान् विहाय अस्य क्षेत्रफलं ३,१८,१४,६४० वर्गमील प्रमाणमस्ति। अयं विशालतमः महासागरः न भूते सत्यपि अस्याधीनं विश्वस्य सर्वेभ्योऽधिकं जलप्रवाहक्षेत्रं वर्तते।

उत्तरीय-अन्धमहासागरस्य पृष्ठतलस्य लवणता अन्यसमुद्रेभ्यः अधिका वर्तते। अस्याधिकतमा मात्रा ३.७ प्रतिशतं यावदस्ति, या २०° ३०° उत्तर-अक्षांशमध्ये विद्यमाना वर्तते। अन्यभागेषु लवणता अपेक्षातः न्यूना अस्ति।

अस्य मितकं एकेन कूटेन (पर्वतशिखरं) पूर्वा एवं पश्चिमीद्रोणीषु (उपत्यका/खाई) विभक्तं वर्तते। आसु द्रोणीषु अधिकगहनता १६,५०० हस्तपरिमिता (फूट) ततोप्यधिका वर्तते।

पूर्वोक्तसमुद्रान्तरकूटम् अत्यन्तमुन्नतं वर्तते। तत् आइसलैण्डस्य समीपतः आरभ्य ५५° डिग्री दक्षिण-अक्षांश-स्थित बोवे द्वीपपर्यन्तं व्याप्तम् अस्ति। अस्य महासागरस्य उत्तरीयभागे कूटमिमं डोलफिन, चेलेन्जर इति नाम्ना सर्वे जानन्ति। अस्य कूटस्य विस्तारः अनुमानतया १०,००० हस्तपरिमितमानं यावत् अखण्ड वर्तते। तत्र अजोर्स, सैरपोल, अर्सेशन, ट्रीस्टोद, कुन्हा एवं बोवे नामकद्वीपाः स्थिताः वर्तन्ते।

तथा दक्षिण-अन्धमहासागरस्य वालफिशकूटः रियोग्रेंडकूटः तथा उत्तरीय-अन्धमहासागरस्य वाइविलरामसनकूटः इत्यादयः सुप्रसिद्धः वर्तन्ते।

इमे त्रयः कूटाः मुख्यकूटतः लम्बमानदिशि व्याप्तानि सन्ति।

इ. कोसना (१९२१) इत्यस्य मतानुसारं अस्य महासागरस्य सामान्यतया गहनता अन्तर्गतसमुद्रान् विहाय ३९२६ मीटर अर्थात् १२,८३९ हस्तपरिमिता वर्तते। अत्यधिकगहनता ८७५० मीटर अर्थात् २८६१४ हस्तपरिमिता वर्तते। इयं गहनता गिनीस्थली इत्यस्य पोटोरिकी द्रोणीमध्ये वर्तते।

अन्धमहासागरस्य मुख्यस्थली इत्यस्य ७४ % प्रतिशतभागः तलप्लावीनिक्षेपैः (पेलाजिक डिपाजिट्स) आवृतः वर्तते। यस्मिन् जीवानां शल्कानि (ग्लोबिजराइना-टेरोपॅड, डायाटम) आदि सन्ति। शेषे २६ % प्रतिशतभागे भूमिज-अवसादीनां (सेडिमेंट्स) निक्षेपः वर्तते। यः महत्कणैः निर्मितः वर्तते।

अन्धमहासागरस्य पृष्ठधाराः नियतवाहीपवनानुरूपाः वहन्ति। आसु धारासु उत्तरी-विषुववृत्तीयधारा, गल्फस्ट्रीम्, उत्तरी-अन्धप्रवाहः, कैनरीधारा एवं लैब्रोडोरधाराः मुख्याः सन्ति।

दक्षिण-अन्धमहासागरस्य धारासु दक्षिणी-विषुववृत्तीयधारा, ब्राजीलधारा, फाकलेंडधारा, पछर्वांप्रवाहः एवं बेंगुलाधाराः मुख्याः सन्ति।

**हिन्दमहासागरः (Indian Ocean) -**

हिन्दमहासागरः विश्वस्य तृतीयः महत्तमः समुद्रः वर्तते। धरातलस्थितस्य जलस्य (अनुमानतया) २० %

प्रतिशतजलं अस्मिन् महासागरे समाहितमस्ति। पश्चिमदिशि पूर्व- आफ्रिका देशेन पूर्वस्यांदिशि हिन्दचीन-सुंदाद्वीपसमूहेन तथा ओस्ट्रेलिया देशेन एवं दक्षिणस्यांदिशि दक्षिणध्रुवीय महासागरेणावृत: वर्तते।

संपूर्णविश्वस्मिन् अयम्-एक-ए महासागर: अस्ति, यस्य नाम हिन्दुस्तान: (भारतदेश:) इत्यस्योपरि हिन्दमहासागर: इत्याख्यातम् अस्ति। संस्कृतभाषायाम् अस्य नाम रत्नाकर: इत्यस्ति। तथापि प्राचीनग्रन्थेषु अस्य नाम हिन्दमहासागर: इति वर्णितम्।

हिन्दमहासागरस्य पृष्ठधाराणां परिसंचरणम् असम्मितम् वर्तते। आफ्रिका एवम् ओस्ट्रेलिया इत्यनयो: देशयो: दक्षिणशिरासु अस्य महासागरस्य विस्तृति: (चौडाई) अनुमानतया १०,००० कि.मी. (६२०० मील) अस्ति। अस्य क्षेत्रफलं ७३,५५,६०००० वर्ग कि.मी. (२८४००००० वर्गमील) परिमितमस्ति। यस्मिन् लालसागर: एवं फारस-उपत्यका (फारस खाई) आवर्तते।

महासागरे जलस्य मात्रा २९२.१३१.००० घन कि.मी. (७००८६०० घनमील) इत्यनुमीयते।

हिन्दमहासागरस्य मुख्यद्वीप: मडागास्कर: वर्तते। य: विश्वस्य चतुर्थ: महाद्वीप: अस्ति। रियूनियनद्वीप:, कोमोरोस, सेशेल्स, मालदीव, मोरेशियस, श्रीलङ्का. एवम् इन्डोनेशिया द्वीपसमूह: महासागरस्य पूर्वीसीम्न: निर्धारणं करोति।

हिन्दमहासागरस्य व्यापारदृष्ट्या अत्यधिकमहत्त्वं वर्तते। हिन्दमहासागर: युरोप: एवम् अमेरिकादेशेन सार्धं मध्यपूर्वआफ्रिका एवं पूर्व-एशियाखण्डं संयोजयितुं प्रमुखमार्गाणां प्रदानं करोति। तत्र फारस-उपत्यका एवम् इन्डोनेशिया देशस्य तैलक्षेत्रै: पेट्रोलियम् एवं पेट्रोलियमुत्पादकानाम् अत्यधिकमात्रायाम् यातायात: प्रवर्तते।

साउदीअरब, इरान, भारतम् एवं पश्चिमी ओस्ट्रेलिया देशस्य उपतटीयक्षेत्रेषु हाइड्रोकार्बन इत्यस्य महदाकराणाम् (भण्डाराणां) उपयोग: क्रियते। विश्वस्य उपतटीयतैलउत्पादनस्य अनुमानित ४० % प्रतिशतं तैलं हिन्द-महासागरादायाति। अस्य समुद्रतलं खनिजै: व्याप्तं वर्तते। बहुमात्रायाम् तत: खनिजानि प्राप्यन्ते।

अस्य सामान्यतया गहनता ३७४१ मीटर (१२२७४ हस्तपरिमिता) परिमाणा अस्ति। एवम् अत्यधिकगहनता ७९०६ मीटर (२५९३८ हस्तपरिमिता) परिमाणा अस्ति।

हिन्दमहासागर: कृत्रिमतया सुएजप्रवाह (नहर) भूमध्यसागरेण सह मिलित: वर्तते। सर्वे हिन्दमहासागरा: (उपसमुद्रा:) पूर्वीयगोळार्धे सन्ति। एवं पूर्वीयगोलार्धस्य केन्द्रस्थानम् अस्मिन् महासागरे अस्ति।

### दक्षिणध्रुवीयमहासागर: (Antarctic Ocean) -

दक्षिणध्रुवीयमहासागर: दक्षिणीमहासागर: एवम् एन्टार्कटिकमहासागर: इति नामभ्यामपि ख्यात:। विश्वस्य सर्वतो - दक्षिणदिशि स्थित: एक-एव महासागरोऽयं विद्यते। अयं पञ्चमहासागरेषु चतुर्थ: महत्तम: महासागर: विद्यते।

अस्य-विस्तार: ६०° दक्षिण-अक्षांशत: दक्षिणभागे वर्तते। तथा च संपूर्णम्-एन्टार्कटिकमहाद्वीपं परित: व्याप्त: अस्ति। अस्मिन् महासागरीयक्षेत्रे उत्तरीयदिक्प्रति वहमानं शीतलएन्टार्कटिकजलं उष्ण-उप-एन्टार्कटिकजलेन सह मिलति।

भूगोलवैज्ञानिकेषु दक्षिणध्रुवीयमहासागरस्य उत्तरीयसीमाङ्कननिर्धारणे मतवैविध्यं प्रवर्तते। तेषु केचन अस्य अस्तित्वमपि न स्वीकुर्वन्ति। अपि तु अमुं महासागरं दक्षिणीप्रशान्तमहासागरस्य दक्षिणी-एटलान्टिकमहासागरस्य तथा च हिन्दमहासागरस्य दक्षिणभागं मन्यन्ते।

१९५३ ईस्वीयाब्दे महासागरस्य परिभाषासु दक्षिणध्रुवीयमहासागरस्योल्लेखो नास्ति। ओस्ट्रेलिया देशस्य मतानुसारम् अयं महासागर: ओस्ट्रेलिया देशस्य दक्षिणभागस्य अधोभागत: प्रारभ्यते।

होर्न अन्तरीय - इत्यस्य पार्श्वे एन्टार्कटिकमहासागरस्य गहनता ९०० मीटर पर्यन्ता तथा दक्षिणआफ्रिकादेशस्य दक्षिणस्थिता **अमूलहअंतरीय** समीपे ३६०० मीटर पर्यन्ता गहनता परिगण्यते। अस्मिन् क्षेत्रे लघु बालतरव: क्षुपा: (पौधा) पक्षिण: अन्यजीवजन्तव: दृश्यन्ते। व्हेलमत्स्यस्य मृगयार्थम् अयं महासागर: महत्त्वपूर्ण: मन्यते। अस्मात् स्थानादेव व्हेलमत्स्यस्य महाव्यापार: प्रचलति।

एन्टार्कटिकमहासागरे असंख्यप्लावी हिमशैला: (आइसबर्ग) तीर्यमाणा: भवन्ति। तेषु केचन तीर्यमाणा: हिमशैला: समीपस्य महासागरेषु गच्छन्ति। समुद्रीय-अन्वेषकै: सागरे एकाधिका: ईदृशा: हिमशैला: अपि दृष्टा: सन्ति, येषां क्षेत्रफलं एकशतवर्ग: (१००वर्गमील), ततोप्यधिकम् आसीत्। तेषु केषाञ्चित् हिमशैलानां दीर्घता (लंबाई) १००० हस्तपरिमिता (फुट), ततोप्यधिका आसीत्।

अस्य सागरस्य जलस्तरे तापमानं २९.८° फारनहाइट्स पर्यन्तं भवति। तलप्रदेशस्य तापमानं ३२° त: ३५° फारनहाइट्स पर्यन्तं भवति।

दक्षिण अमेरिकापर्यन्तं गम्यमानस्यास्य मुख्यधारा भागद्वये विभक्ता भवति। एका धारा अमेरिकामहाद्वीपस्य पूर्वी-तटेन सह उत्तरस्यां दिशि प्रयाति। द्वितीयधारा पूर्वस्यां दिशि हार्न-अंतरीयत: अग्रे गच्छति।

एवमेव दक्षिणध्रुवीयमहासागरस्य वैविध्यं दर्शनीयं वर्तते।

**उत्तरध्रुवीयमहासागर: (Arctic Ocean) -**

पृथिव्या: उत्तरीयगोलार्धे स्थित: उत्तरध्रुवीयमहासागर: वा आर्कटिकमहासागर: इति नाम्ना ख्यात: वर्तते। अस्याधिकतरविस्तार: आर्कटिक-उत्तरध्रुवीयक्षेत्रे अस्ति। विश्वस्य पञ्चमहासागरेषु अयं सर्वेभ्य: लघीयान् वर्तते।

अन्ताराष्ट्रियजलसर्वेक्षणसंगठनं (IHO) इमं महासागररूपेण स्वीकरोति। तथा केचन महासागरवैज्ञानिका: इमं महासागरं आर्कटिकभूमध्यसागर: वा केवलम् आर्कटिकसागर: इति नाम्ना जानन्ति।

अयं महासागर: युरेशिया एवम् उत्तरी-अमेरिका इत्यनयोरावृत: अस्ति। तथा च वर्षपर्यन्तम् आंशिकरूपेण समुद्रीयहिमाच्छादित: भवति। तथा शीतकाले पूर्णरूपेण हिमाच्छादित: भवति।

आर्कटिकमहासागरस्य तापमानं एवं लवणता ऋत्वानुसारं परिवर्तमाना भवति। तस्य कारणं हिमस्राव: अस्रवश्च वर्तते।

पञ्चमहासागरेषु अस्य लवणता सर्वेभ्य: न्यूना अस्ति। तस्य कारणं लघुमात्रायाम् बाष्पीकरणं, तथा नदीभि:, धाराभि: अत्यधिकप्रमाणम्। अत्र अमृततुल्यजलागमनम्, तथा उच्चलवणतायुक्तसमुद्रै: सह सीमितसंयोग: वर्तते।

ग्रीष्मकाले अत्र ५० % प्रतिशतं प्रमाणं हिमस्राव: भवति। अत: अत्र अधिकांशत: शैत्यजलमनुभूयते।

एवमेव उत्तरध्रुवीयमहासागरस्य परिचय: वर्तते।

एषु महासागरेषु अन्यदपि बहुवैविध्यं वर्तते। यथा सागरेषु महाजलावर्ता: (जायर - Gyer) तेषु पञ्च-मुख्यजलावर्ता: सन्ति। (१) हिन्दमहासागर: - जलावर्त: (२) उत्तर-एट्लान्टिकजलावर्त: (३) उत्तर-प्रशान्तजलावर्त: (४) दक्षिण-एट्लान्टकजलावर्त: (५) दक्षिण प्रशान्तजलावर्त:।

एतेषां महासागराणां पर्यावरणीयरीत्या अस्माभि: संरक्षणं कर्तव्यम्।

## स्वाध्याय:

### १. योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु।

(१) प्रशांतमहासागर: पृथिव्या: ......... भागप्रमाणं विस्तीर्ण: वर्तते। (१/२, १/३, १/४)

(२) हिन्दमहासागर: ......... इति नाम्ना प्रसिद्ध: वर्तते। (रत्नाकर:, जलाकर:, मत्स्याकर:)

(३) वालफिशकूट: ......... महासागरे वर्तते। (पूर्वी-अन्ध, दक्षिण-अन्ध, पश्चिम-अन्ध)

(४) प्रशान्तमहासागरस्याकृति: ......... भुजाकारमयी वर्तते। (द्वि, त्रि, चतुर्)

(५) प्रशान्तमहासागरस्य पश्चिमतटे ......... सङ्ख्याकाः लघुद्वीपाः अनुमीयन्ते। (८०००, ७०००, ६०००)

(६) व्यापारदृष्ट्या ......... महासागरस्य अत्यधिकमहत्त्वम् अस्ति। (हिन्द, प्रशान्त, उत्तरध्रुवीय)

(७) ......... महासागरे हिमशैलाः वर्तन्ते। (उत्तरध्रुवीय, हिन्द, प्रशान्त)

(८) अन्ताराष्ट्रियजलसर्वेक्षणसंगठनस्य समासतः नाम ......... अस्ति। (I.H.O., O.H.I., H.I.O.)

(९) उत्तरध्रुवीयमहासागरस्य लवणता सर्वेभ्यः ......... अस्ति। (अधिका, न्यूना, सप्रमाणा)

(१०) उत्तरध्रुवीयमहासागरस्य स्वरूपं सर्वेभ्यः ......... अस्ति। (दीर्घं, लघु, समम्)

## २. एकेन वाक्येन उत्तराणि लिखन्तु।

(१) केषां जीवने महासागरस्य महत्त्वपूर्णः उपयोगः क्रियते ?

(२) प्रशान्तमहासागरस्य अधिकतमा गहनता कियति वर्तते ?

(३) अन्धमहासागरस्यापरं नाम किमस्ति ?

(४) '८' अष्टाकृतिकः कः समुद्रः वर्तते ?

(५) अन्धमहासागरस्य पृष्ठधाराः कस्यानुरूपाः प्रवहन्ति ?

(६) पृथिव्याः उत्तरीयगोलार्धे कः समुद्रः वर्तते ?

(७) कस्यमहासागरस्य तटं खनिजैः व्याप्तं वर्तते ?

(८) विश्वस्य चतुर्थः महाद्वीपः कः अस्ति ?

(९) हिन्दमहासागरः कृत्रिमतया केन माध्यमेन भूमध्यसागरेण सह मिलितः अस्ति ?

(१०) दक्षिण अन्धमहासागरस्य काः धाराः सन्ति ?

## ३. टिप्पणीं लिखन्तु।

(१) महासागरस्य स्वरूपम्।

(२) उपत्यकायाः स्वरूपम्।

(३) हिमशैलानां स्वरूपम्।

(४) समुद्रीव्यापारस्य महत्त्वम्।

(५) उपसागराणां स्वरूपम्।

## ४. सविस्तरम् उत्तरं लिखन्तु।

(१) हिन्दमहासागरस्य स्वरूपं वर्णयत।

(२) मानवजीवने महासागराणां महत्त्वम् निदर्शयत।

(३) प्रशान्तमहासागरस्य स्वरूपं वर्णयत।

(४) महासागरान्तर्गतं कूटस्वरूपं वर्णयत।

(५) समुद्रान्तर्गतयातायातमार्गाणां महत्त्वम् लिखत।

## ५. संयोजनं कुरुत।

| अ | ब |
|---|---|
| (१) प्रशान्तमहासागरः | (१) Arctic ocean |
| (२) अन्धमहासागरः | (२) Antartic ocean |
| (३) हिन्दमहासागरः | (३) Pacific ocean |
| (४) दक्षिणध्रुवीयमहासागरः | (४) Indian ocean |
| (५) उत्तरध्रुवीयमहासागरः | (५) Atlantic ocean |
| | (६) Uninans ocean |

### छात्रप्रवृत्तिः

- विविधसमुद्रीजीवानां चित्राणि अवाप्य परिचयः लेख्यः।

### सुभाषितम्

**जामाता जाठरं जाया जातवेदो जलाशयः।**
**पूरिता नैव पूर्यन्ते जकारा पञ्च दुर्लभाः॥**